श्री हर्षपुष्पामृत जैन ग्रन्थमाला ग्रन्थाकः १९३

।। श्री महावीरजिनेन्द्राय नमः ।।

श्रीमणिबुद्ध्याणंदहर्षकर्पूरामृतसूरिभ्यो नमः ।

नवाङ्गवृत्तिकार श्रीमदभयदेवसूरीश्वररचिता

प्रज्ञापनोपाङ्ग-तृतीयपद संग्रहणी

(अवचूरिभूषिता)

संपादकः संशोधकश्च

तपोमूर्ति पूज्याचार्यदेव श्रीविजयकर्पूरसूरीश्वर-पट्टधर-
हालारदेशोद्धारक-पूज्याचार्यदेव
श्रीविजयामृतसूरीश्वर-पट्टधरः

पूज्याचार्यदेव श्री विजयजिनेन्द्रसूरीश्वरः

सहायकः

पूज्याचार्यदेवश्री विजयजिनेन्द्रसूरीश्वर-सुपदेशेन मुंबई
चोपाटीस्थः श्री कल्याणपार्श्वनाथ जैन सङ्घः ।

प्रकाशिका

श्री हर्षपुष्पामृत जैन ग्रन्थमाला

लाखाबावल–शांतिपुरी (सौराष्ट्र)

मुद्रकः–गौत्तम आर्ट प्रिन्टर्स नेहरु गेट बाहर, ब्यावर

श्री हर्षपुष्पामृत जैन ग्रन्थमाला ग्रन्थाकः १९३

।। श्री महावीरजिनेन्द्राय नमः ।।

श्रीमणिबुद्ध्याणंदहर्षकर्पूरामृतसूरिभ्यो नमः ।

नवाङ्गवृत्तिकार श्रीमदभयदेवसूरीश्वररचिता

प्रज्ञापनोपाङ्ग-तृतीयपद संग्रहणी

(अवचूरिभूषिता)

संपादकः संशोधकश्च

तपोमूर्ति पूज्याचार्यदेव श्रीविजयकर्पूरसूरीश्वर-पट्टधर-
हालारदेशोद्धारक-पूज्याचार्यदेव
श्रीविजयामृतसूरीश्वर-पट्टधरः

पूज्याचार्यदेव श्री विजयजिनेन्द्रसूरीश्वरः

सहायकः

पूज्याचार्यदेवश्री विजयजिनेन्द्रसूरीश्वर-सुपदेशेन मुंबई
चोपाटीस्थः श्री कल्याणपार्श्वनाथ जैन संङ्घः ।

प्रकाशिका

श्री हर्षपुष्पामृत जैन ग्रन्थमाला

लाखाबावल-शांतिपुरी (सौराष्ट्र)

मुद्रकः-गौत्तम आर्ट प्रिन्टर्स नेहरु गेट बाहर, ब्यावर

प्रकाशिका—
श्री हर्षपुष्पामृत जैन ग्रन्थमाला (लाखाबावल)
C/o श्रुत ज्ञान भवन
४५ दिग्विजय प्लोट **जामनगर** (सौराष्ट्र)

वीर सं०	वि. सं.	सन्	प्रथमावृत्तिः
२५१५	२०४५	१९८९	प्रतयः ७५०

卐 आभारदर्शन 卐

अमारी ग्रन्थमाला तरफथी **प्राचीन** साहित्यप्रकाशन योजनामा **श्री प्रज्ञापनोपाङ्ग—तृतीयपद संग्रहणी** प्रगट करतां आनंद अनुभवीए छाए-तेनुं संपादन हालारदेशोद्धारक पूज्याचार्यदेव **श्री विजय-अमृतसूरीश्वरजी** महाराजाना पट्टधर पूज्याचार्यदेव **श्रीविजयजिनेन्द्रसूरीश्वरजी** महाराजे कर्युं छे. तेओश्रीना उपदेशथी आ ग्रन्थ **मुंबइ चोपाटी श्री कल्याणपार्श्वनाथ जैन संघ** तरफथी प्रगट करीए छीए श्री चोपाटी कल्याणपार्श्वनाथ श्री संघनो सहकार माटे आभार मानीए छीए.

ता० २-६-८९
शाकमारकेट सामे **जामनगर**

महेता मगनलाल चत्रभुज
व्यवस्थापक :
श्री हर्षपुष्पामृत जैन ग्रन्थमाला

॥ शुद्धिपत्रकम् ॥

पृष्ठं	पंक्तिः	शुद्धम्
२४	१७	गर्भव्यूत्क्रांतिकेषु
४३	११	पञ्चेन्द्रिय
४९	१०	समुद्घातेन
७१	४	सामान्यतस्तिर्यञ्चो

॥ अर्हम् ॥

पू० आ० श्रीविजयभुवनतिलकसूरिभ्यो नमः ।

नवांङ्गवृत्तकारश्रीमदभयदेवसूरीश्वररचिता

प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी ।

(अवचूरिभूषिता)

दिसि १ गइ २ इंदिय ३ काए ४,
जोए ५ वेए ६ कसाय ७ लेसा य ।
सम्मत्त ९ नाण १० दंसण ११ संजम
१२ उवओग १३ आहारे १४ ॥ १ ॥
भासग १५ परित्त १६ पज्जत्त १७ सुहुम
१८ सन्नी १९ भवि (भव) २० ऽत्थिए २१,
चरिमे २२ जीवे य २३ खित्त २४ बंधे
२५ पुग्गल २६ महदंडए २७ चेव ॥ २ ॥

'परित्त' इति परीताः प्रत्येकशरीरिणः शुक्लपाक्षिकाश्च तद् द्वारम् १६ । 'भवि' इति भवसिद्धिकद्वारम् २० । अस्तीति अस्तिकायद्वारम् २१ । एतैर्दिग्विभागादि २७ द्वारैः पृथिव्यादीनामल्पबहुत्वादिनिरूपणाय द्वारसंग्रहगाथाद्वयम् ॥ १-२ ॥

रुयगा पच्छिमपुव्वा दाहिणओ उत्तरेण जहसंखं ।
थोवा बहुआ बहुतर बहुतमगा हुंति जीवाओ ॥ ३ ॥

जत्थ व(ज)णं तत्थ जिया,
बहुया तं पुण जलस्स निस्साए ।
ता जत्थ जलं थोवं तत्थ,
उ जीवा उ थोवयरा ॥ ४ ॥
पुव्वावरासु चंदिमरविदीवा अत्थि तेण जलमप्पं ।
गोयमदीवो अवराइ अत्थि तं तेण अप्पयरं ॥ ५ ॥

तिर्यग्लोकमध्यगतादष्टप्रदेशाद् रुचकात् 'अट्ठपएसो रुयगो' । इदं ह्यल्पबहुत्वं बादरानधिकृत्य न सूक्ष्मास्तेषां सर्वलोकापन्नत्वेन प्रायः सर्वत्रापि समत्वात् ॥ ३ ॥ जलेऽवश्यं पनकसेवालादीनां भावात् । ते च पनकादयो बादरनामकर्मोदयेऽपि अत्यन्तसूक्ष्मावगाहनत्वादतिप्रभूतपिण्डीभावाच्च सर्वत्र सन्तोऽपि न चक्षुषा ग्राह्याः ॥ ४ ॥ समुद्रेषु प्रत्येकं प्राचीप्रतीचीदिशोर्यथाक्रमं चन्द्रसूर्यद्वीपाः । [1]लवणसमुद्राधिपसुस्थितदेवावासभूतो गोतमद्वीपः प्रतीच्यामधिकः ॥ ५ ॥

चंदाइदीवविरहा उ दाहिणे होइ बहुतरं तोयं ।
तत्तो य उत्तरेणं माणससरसंभवा बहुयं ॥ ६ ॥
बारस य सहस्साइं वित्थरओ जोयणाण लवणजले ।
अत्थि हु गोयमदीवो उच्चो छावत्तरसहस्सं ॥ ७ ॥

---

१. इतः प्राक् 'यत्र द्वीपाः तत्रोदकाभावः, तस्याभावाद्वनस्पतेरभावः । केवल' इत्यधिकं क्वचित् ।

[1]जोयणकोडी [2]उण संखया उ विक्खंभदीहरत्तेहिं ।
माणससरत्थि दीवंमि बाहिरे उत्तराइ तहा ॥ ८ ॥
एवं जलवणविगला तेरिच्छिपणिंदिया य बोधव्वा ।
सव्वेसिमेसिमेवं पभूयउप्पायसंभवओ ॥ ९ ॥
जम्माइ पुढवि थोवा विसेसअहिया उ होइ उत्तरओ ।
तत्तो वि हु पुव्वेणं तत्तो वि य होइ पच्छिमओ ॥१०॥
सुसिरे थोवा पुढवी घणंमि बहुग त्ति तेण दाहिणओ ।
भवणाणं बहुयत्ता उत्तरओ भवणथोवत्ता ॥ ११ ॥

संख्येययोजनेषु द्वीपेषु मध्ये कस्मिंश्चिद्द्वीपे[3] ॥ ८ ॥ दक्षिणस्यां बहूनि भवनपतीनां भवनानि बहवो नरकावासास्ततः शुषिरप्राभृत्यम्[4] ॥ ११ ॥

चंदाइदीवभावा पुव्वाए पच्छिमे वि तब्भावा ।
गोयमदीवो य तहा पुढवि जहुत्ता भवे एवं ॥ १२ ॥

यावन्तो रविशशिद्वीपाः पूर्वस्यां दिशि तावन्तः पश्चिमायामपि तत एतावता साम्यम्, परं लवणसमुद्रे गौतमद्वीपः पश्चिमायामधिकोऽस्ति, तेन विशेषाधिकाः । ननु यथा

---

१. संख्येययोजनकोटाकोटीप्रमाणमित्यर्थः । २. 'पुण' इत्यपि ।
३. इतोऽग्रे क्वचित्पुस्तके--"आयामविष्कम्भाभ्यां संख्येययोजनकोटीप्रमाणं मानसनाम सरोऽस्ति" इत्यधिकम् । ४. क्वचित्-"प्राभृत्यसंभवाद्कं स्तोकम्" इत्यधिकम् ।

पश्चिमायां गौतमद्वीपोऽभ्यधिकः समस्ति तथा तस्यामधो-लौकिकग्रामा अपि योजनसहस्रावगाहाः सन्ति, ततः खातपूरि-तन्यायेन तत्र तुल्या एव पृथिवीकायिकाः प्राप्नुवन्ति न विशेषाधिकाः। नैवम्, यथाऽधोलौकिकग्रामावगाहो योजन-सहस्रम्, गौतमद्वीपस्य पुनः षट्सप्तत्यधिकं योजनसहस्रमुच्चै-स्त्वम्। विष्कम्भस्तस्य द्वादशयोजनसहस्राणि, ततो यद्य-धोलौकिकग्रामच्छिद्रेषु बुद्ध्या गौतमद्वीपः प्रक्षिप्यते तथापि समधिक एव प्राप्यते न तुल्य इति ॥ १२ ॥

तेऊ १ मणुया २ सिद्धा ३,
उत्तर १ जम्मासु २ हुंति थोव त्ति ।
पुव्वाए संखगुणा
अवरेण पुण विसेसहिया ॥ १३ ॥

पायारंभा मणुया ते पुण थोवा दिसादुगे हुंति ।
भरहाइसु खित्तस्सप्पभावओ ते उ ता थोवं ॥ १४॥

'तेऊ' सुगमा ॥ १३ ॥ दक्षिणस्यां पञ्चसु भरतेषु उत्तर-स्यां पञ्चस्वैरवतेषु क्षेत्रस्याल्पत्वात् स्तोका मनुष्याः, तेषां स्तोकत्वेन तेजस्कायिका अपि स्तोका अल्पपाकारम्भसं-भवात्। ततः स्तोका दक्षिणोत्तरयोर्दिशोस्तेजस्कायिकाः। स्वस्थाने तु प्रायः समानाः ॥ १४ ॥

खित्तबहुत्तेण विदेहवासिणो हुंति बहुतरा पुरिसा ।
अवरेण अहोलोइयगामेसु बहुत्तमा हुंति ॥ १५ ॥

तम्हा तेऊ मणुया,
सिद्धा वि हु हुंति भणियपरिमाणा ।
मणुयगईए सिद्धा,
हवंति जं तेण मणुयसमा ॥ १६ ॥

इह मनुष्या एव सिध्यन्ति नान्ये । मनुष्या अपि सिध्यन्तो येष्वाकाशप्रदेशेष्विह चरमसमयेऽवगाढास्तेष्वेवाकाशप्रदेशेषूर्ध्वमपि गच्छन्ति तेष्वेव चोपर्यवतिष्ठन्ते, न मनागपि बहिर्गच्छन्ति सिध्यन्ति वा, इत्यतो मनुष्यसमत्वं सिद्धानामल्पबहुत्वमाश्रित्य । अयमर्थः–यस्यां दिशि मनुष्याः स्तोकास्तस्यां सिद्धा अपि स्तोकाः, यस्यां, दिशि मनुष्या अधिकास्तस्यां सिद्धा अप्यधिकाः ॥ १६ ॥

वाऊ १ वंतरदेवा २,
पुव्वेण १ ऽवरेण २ उत्तरेणं ३ तु ।
दाहिणओ ४ य कमेणं
थोवा १, बहु २ बहुग ३ बहुग ४ त्ति ॥१७॥

सुसिरंमि होइ वाऊ घणंमि सो नत्थि तेण पुव्वाए ।
सुसिरअभावा वाऊ थोवो तह वंतरसुरा य ॥ १८ ॥

अवराइ विसेसहिओ अहलोइगगामसंभवा वाऊ ।
तत्तो वि उत्तराए भवणच्छिड्डाण बहुयत्ता ॥ १९ ॥

तत्तो वि दाहिणेणं बहुतरओ भवणछिड्डबहुयत्ता ।
दाहिणभवणाणि जओ बहुयाइं उत्तरेहिंतो ॥ २० ॥

उत्तरदिगपेक्षया दक्षिणस्यां निकाये निकाये चतुश्चतुर्लक्षभवनानां नरकावासानां चाधिकत्वात् बहूनां कृष्णपाक्षिकाणां जीवानां तत्रोत्पद्यमानत्वात् । तथा यत्र शुषिरं तत्र व्यन्तराः प्रचरन्ति, यत्र घनं तत्र न, इति तेऽपि यथोक्ता ज्ञातव्याः ॥ १७-२० ॥

नेरइया अइथोवा दिसातिए हुंति दाहिणेण पुणो ।
अस्संखगुणा तत्तो एवं चिय बंभलोयसुरा ॥ २१ ॥

सर्वस्तोकाः पूर्वोत्तरपश्चिमदिक्त्रये नैरयिकाः, पुष्पावकीर्णनरकावासानां तत्राल्पत्वात् बहूनां प्रायः सङ्ख्येययोजनविस्तृतत्वाच्च । तेभ्यो दक्षिणदिग्भाविनोऽसङ्ख्येयगुणाः, पुष्पावकीर्णनरकावासानां तत्र बाहुल्यात् तेषां च प्रायोऽसङ्ख्येययोजनविस्तृतत्वात् कृष्णपाक्षिकाणां तस्यां दिशि प्राचुर्येणोत्पादाच्च । तथाहि–द्विविधा जन्तवः कृष्णपाक्षिकाः शुक्लपाक्षिकाश्च । उक्तं च–"**जेसिमवड्ढो पुग्गलपरियट्टो सेसओ य संसारो । ते सुक्कपक्खिया खलु अहिए पुण**

किण्हपक्खीओ" ॥ १ ॥ एवं ब्रह्मलोकसुरा अपि । यतः कृष्णपाक्षिकतिर्यग्योनीनां बहुत्वात् दिक्त्रयोत्पदिष्णुशुक्लपाक्षिकाणां स्तोकत्वात् ॥२१॥ नैरयिकाणां सामान्यतो दिग्विभागेनाल्पबहुत्वमुक्तम् । अथ सप्तम्यादिपृथिवीविभागेनाह—

अहसत्तमाइ दिसितियनेरइएहिं तओ असंखगुणा ।
दाहिणओ तेहिंतो छट्ठीइ दिसातिउप्पन्ना ॥ २२ ॥
तेहिंतो दाहिणया असंखगुणिया उ हुंति छट्ठीए ।
एएणेव कमेणं सव्वासु वि जाव रयणपहा ॥ २३ ॥

अधःसप्तमपृथिव्यां पूर्वोत्तरपश्चिमदिग्भाविनैरयिकेभ्यो दाक्षिणात्या असङ्ख्येयगुणाः । तेभ्यः षष्ठपृथिवीपूर्वोत्तरपश्चिमनैरयिका असङ्ख्येयगुणाः । कथम् ? सर्वोत्कृष्टपापकारिणः संज्ञिपञ्चेन्द्रियतिर्यग्मनुष्याः सप्तमपृथिव्यामुत्पद्यन्ते, किञ्चिद्धीनहीनतरपापकारिणश्च षष्ठ्यादिषु सर्वोत्कृष्टपापकारिणश्च स्तोकाः, बहवश्च हीनहीनतरपापकारिणः । ततो युक्तमसङ्ख्येयगुणत्वं सप्तमपृथिवीदाक्षिणात्यनारकेभ्यः षष्ठपृथिव्यां दिक्त्रयभाविनारकाणाम् । एवमुत्तरोत्तरपृथिवीरधिकृत्य भावयितव्यम् ॥ २२ ॥ २३ ॥

दाहिणया नेरइया असंखगुणिया य थोवया अण्णे ।
ते पावाओ तह किन्हपक्खियत्तेण जं हुंति ॥ २४ ॥

कृष्णपाक्षिका दीर्घतरसंसारभाजिन उच्यन्ते । दीर्घतरसंसारभाजिनश्च बहुपापोदयाः स्युः । ते च क्रूरकर्माणः । ते च प्रायस्तथास्वाभाव्यात् तद्भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यन्ते न शेषासु दिक्षु । यदुक्तम्–"पायमिह क्रूरकम्मा भवसिद्धीयावि दाहिणिल्लेसु । नेरइयतिरियमणुयासुराइठाणेसु गच्छंति ॥ १ ॥" ततो दक्षिणस्यां बहूनां कृष्णपाक्षिकाणामुत्पादात्पूर्वोक्तकारणद्वयाच्च संभवन्ति पूर्वोत्तरपश्चिमदिग्भाविभ्यो दाक्षिणात्या असङ्ख्येयगुणाः ॥ २४ ॥

[1]तह किन्हपक्खतिरिया उववज्जे दाहिणेण ते बहुया ।
इयरा उत्तरओ तो जहउत्ता बम्भलोयसुरा ॥ २५ ॥

ब्रह्मलोककल्पे सर्वस्तोकाः पूर्वोत्तरपश्चिमदिग्भाविनो देवा, यतो बहवः कृष्णपाक्षिकास्तिर्यग्योनयो दक्षिणस्यामुत्पद्यन्ते, शुक्लपाक्षिकाश्च स्तोका इति शेषदिक्त्रयभाविनः स्तोकाः । तेभ्यो दक्षिणस्यां सङ्ख्येयगुणाः ॥ २५ ॥

भवणवई १ सोहम्मा २,
थोवा पुव्वावरेण उत्तरओ ।
अस्संखा दाहिणओ कम-
सोऽसंखिज्ज १ अहिया २ य ॥ २६ ॥

---

१. "जं किण्हप०" इत्यपि पाठः ।

पुव्वावरासु भवणा थोवा बहुया उ उत्तराइ तओ ।
दाहिणओ बहुतरया भवणवई तो 'जहुत्त त्ति ॥२७॥

आवलियठिया तुल्ला सव्वदिसासुं सुहम्मसुरभवणा ।
पुप्फावकिन्नगा पुण बहुतरया दाहिणुत्तरओ ॥ २८ ॥

तेण जहुत्ता देवा सोहंमा जं पुणित्थ दाहिणओ ।
अहिगयरत्ती तं पुण दाहिणगामि त्ति किण्हजिया ॥२९

आवलिकाप्रविष्टानि विमानानि चतसृष्वपि दिक्षु तुल्यानि । यानि पुनः पुष्पावकीर्णानि तानि प्रभूतान्यसङ्ख्येययोजनविस्तृतानि । तानि च दक्षिणस्यामुत्तरस्यां च नान्यत्र । ततः सर्वस्तोकाः पूर्वापरभाविनः सौधर्मदेवाः । तेभ्य उत्तरस्यामसङ्ख्येयगुणाः, असङ्ख्येययोजनविस्तृतपुष्पावकीर्णानां बाहुल्यात् । तेभ्यो दक्षिणस्यां विशेषाधिकाः, कृष्णपाक्षिकाणां प्राचुर्येण तत्र गमनात् । भवनपतयोऽप्युत्तराभाविभ्यो दक्षिणस्यामसङ्ख्येयगुणाः, तत्र भवनानामतीवबाहुल्यात् । यतस्तत्र प्रतिनिकायं चत्वारि भवनानां लक्षाण्यतिरिच्यन्ते कृष्णपाक्षिकाणां बहूनां तत्रोत्पादाच्च । अतः क्रमशो भवनपतिसौधर्मा उत्तराभाविभ्यो दक्षिणस्यामसङ्ख्येया अधिकाश्च भवन्ति ॥ २६–२९ ॥

---

१. "जहन्नु त्ति–जुहुत्तु त्ति" इत्यपि पाठः ।

पुव्वावरासु थोवा जोइसिया दाहिणे विसेसहिया ।
तत्तो विसेसअहिया उत्तरओ हुंति जोइसिया ॥३०॥

जोइसिया दाहिणओ बहुतरगा किण्हपक्खिउप्पाया ।
माणससरम्मि कीडत्थमागया उत्तरि त्ति बहू ॥ ३१ ॥

उप्पाया उ तदुब्भवविहियनियाणाण मच्छजीवाण ।
पुव्वावरासु ते पुण अइथेवा पारिसेसा उ ॥ ३२ ॥

सर्वस्तोका ज्योतिष्काः पूर्वस्यामपरस्यां च, चन्द्रादित्यद्वीपेषूद्यानकल्पेषु कतिपयानामेव तेषां भावात् । तेभ्योऽपि दक्षिणस्यां विशेषाधिकाः, विमानबाहुल्यात्कृष्णपाक्षिकाणां तद्भिभावित्वाच्च । तेभ्योऽप्युत्तरस्यां विशेषाधिकाः, यतो मानसे सरसि बहवो ज्योतिष्काः क्रीडाव्यावृत्ता नित्यमासते, मानससरसि च ये मत्स्यादयो जलचरास्ते आसन्नविमानदर्शनतः समुत्पन्नजातिस्मरणाः किञ्चिद्व्रतं प्रतिपद्यानशनादि च कृत्वा कृतनिदानास्तत्रोत्पद्यन्ते ॥ ३०–३२ ॥

सोहंमे इव तदुवरि तिगंमि बंभे व जा सहस्सारो ।
तेण परं जे देवा बहुसम उववन्नया ते उ ॥ ३३ ॥

उप्पज्जंति नरा एव जेण तेसुं ति तो जहुत्ता ते ।
उक्कमभणणं पुढवाइयाणमिह लाघवत्थि त्ति ॥ ३४ ॥

॥ दारं १ ॥

सौधर्म इव तदुपरि त्रिके ईशानसनत्कुमारमाहेन्द्ररूपे भावना । ब्रह्मलोक इव लान्तकशुक्रसहस्रारेषु भावना कार्या ॥ ३३ ॥ ततः परमानतादिषु पुनर्मनुष्या एवोत्पद्यन्ते तेन प्रतिकल्पं प्रतिग्रैवेयकं प्रत्यनुत्तरविमानं च चतसृषु दिक्षु प्रायो बहुसमा वेदितव्याः । क्रमस्तु पृथिव्यप्तेजोवायुवनस्पति-द्वित्रिचतुरिन्द्रियनरकसप्तमपृथिवीपञ्चेन्द्रियतिर्यग्मनुष्य भवन-पतिव्यन्तरज्योतिष्कसौधर्मादिदेवसिद्धरूपः प्रज्ञापनातृतीयप-दोक्तः ॥ ३४ ॥ द्वारम् १ ॥

नर १ नेरइया २ देवा ३,
सिद्धा ४ तिरिया ५ जहुत्तरं नेया ।
थोवा १ दुन्नि ३ असंखा
अणंतगुणिया ४ अणंतगुणा ५ ॥ ३५ ॥

सर्वस्तोका मनुष्याः, षण्णवतिच्छेदनकछेद्यराशिप्रमाण-त्वात् १ । तेभ्यो नैरयिका असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्र-प्रदेशराशेः संबन्धिनि प्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते यावान्प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यै-कप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात् २ । तेभ्यो देवा असङ्ख्येयगुणाः, व्यन्तराणां ज्योतिष्काणां च प्रत्येकं प्रतरासङ्ख्येयभागवर्तिश्रेणिगताकाशप्रदेशराशिप्र-माणत्वात् ३ । तेभ्यः सिद्धा अनन्तगुणाः, अभव्येभ्योऽनन्त-

गुणत्वात् ४। तेभ्यस्तिर्यग्योनिका अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात् ५ ॥ ३५ ॥

नारी १ नर २ नेरइया ३,
तेरिक्खी ४ सुर ५ सुरी ६ सिवा ७ तिरिया ८।
थोवा १ चउर ५ असंखा,
संखगुणा ६ दो ८ अणंतगुणा ॥ ३६ ॥
नारीण असंखगुणा,
मणुया जं वन्निया तदित्थमहो।
संमुच्छिमगहणाओ,
न विवक्खा संढवेयंमि ॥३७॥ दारं २॥

नार्यो मनुष्यस्त्रियः स्तोकाः, सङ्ख्येयकोटीकोटीप्रमाणत्वात् १। ताभ्यो 'नर'इति मनुष्या असङ्ख्येयगुणाः। इह मनुष्या इति संमूर्च्छनजा अपि गृह्यन्ते, वेदस्याविवक्षणात्। ते च संमूर्च्छनजा वान्तादिषु नगरनिर्द्धमनान्तेषु जायमाना असङ्ख्येयगुणाः प्राप्यन्ते २। तेभ्यो नैरयिका असङ्ख्येयगुणाः, मनुष्या ह्युत्कृष्टपदेऽपि श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणा लभ्यन्ते। नैरयिकास्त्वङ्गुलमात्रक्षेत्रप्रदेशराशिसत्कतृतीयवर्गमूलगुणितप्रथमवर्गमूलप्रमाणश्रेणिगताकाशप्रदेशराशिप्रमाणाः, अतो भवन्त्यसङ्ख्येयगुणाः ३। तेभ्यस्तिर्यक्स्त्रियोऽसङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिनभः-

प्रदेशराशिप्रमाणत्वात् ४ । तेभ्योऽपि देवा असङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवर्त्त्यसङ्ख्येयश्रेणिगतप्रदेशराशिमानत्वात् ५ । तेभ्योऽपि देव्यः सङ्ख्येयगुणाः, द्वात्रिंशद्गुणत्वात् ६ । ताभ्यः 'सिद्धा' इति सिद्धा अनन्तगुणाः, अभव्यानन्तगुणत्वात् ७ । तेभ्योऽपि तिर्यग्योनिका अनन्तगुणाः ॥ ३६ ॥ ३७ ॥ द्वारं २ ॥

पण १ चउ २ ति ३ दु ४ अक्खाणिं-
दिया ५ य एगिंदिया ६ य सिंदियया ७ ।
थोवा १ तिन्नि ४ समहिया,
दुन्नि ६ अणंता विसेसहिया ७ ॥ ३८ ॥

एगिंदिएसु सेसगपक्खेवा सिंदिया विसेसहिया ।
सह इंदिएहिं जम्हा सइंदिया ते अ [1]सव्वजिआ ॥३९

सर्वस्तोकाः पञ्चेन्द्रियाः, सङ्ख्येययोजनकोटीकोटीप्रमाण-विष्कम्भसूचीप्रमितायाः प्रतरासङ्ख्येयभागवर्त्तिन्योऽसङ्ख्येयश्रेण्यस्तद्गताकाशप्रदेशराशिप्रमाणत्वात् १ । तेभ्यश्चतुरिन्द्रिया विशेषाधिकाः, तेषां विष्कम्भसूच्याः प्रभूतसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात् २ । तेभ्योऽपि त्रीन्द्रिया विशेषाधिकाः, तेषां विष्कम्भसूच्याः प्रभूततरसङ्ख्येययोजनकोटीकोटीमान-

---

१. सिद्धवर्जाः इत्यर्थः ।

त्वात् ३ । तेभ्योऽपि द्वीन्द्रिया विशेषाधिकाः, तद्विष्कम्भसूच्याः प्रभूततमसङ्ख्येययोजनकोटीकोटीमानत्वात् ४ । तेभ्योऽनिन्द्रिया अनन्तगुणाः, सिद्धानामनन्तत्वात् ५ । तेभ्योऽप्येकेन्द्रिया अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात् ६ । तेभ्यः सेन्द्रिया विशेषाधिकाः, द्वीन्द्रियादीनामपि तत्र प्रक्षेपात् ७ ॥ ३८ ॥ ३९ ॥

पज्जत्ता चउकरणा थोवा पंचिंदिया विसेसहिया ।
बेइंदिया उ तत्तो तत्तो तेइंदिया अहिया ॥ ४० ॥

सर्वस्तोकाश्चतुरिन्द्रियाः पर्याप्ताः, यतस्तेऽल्पायुषोऽतः प्रभूतकालमवस्थानाभावात् पृच्छासमये स्तोका अवाप्यन्ते । ते च प्रतरे यावन्तङ्गुलसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणा ज्ञातव्याः । तेभ्यः पञ्चेन्द्रियाः पर्याप्ता विशेषाधिकाः, प्रभूतप्रतराङ्गुलसङ्ख्येयभागमात्रखण्डप्रमाणत्वात् । तेभ्योऽपि द्वीन्द्रियाः पर्याप्ता विशेषाधिकाः, प्रभूततरप्रतराङ्गुलसङ्ख्येयभागखण्डमानत्वात् । तेभ्योऽपि त्रीन्द्रियाः पर्याप्ता विशेषाधिकाः, स्वभावत एव प्रभूततमप्रतराङ् गुलसङ्ख्येयभागखण्डमानत्वात् ॥ ४० ॥

तेहिंतो पंचक्खा असंखगुणिया भवंत पज्जत्ता ।
चउकरण विसेसहिया तत्तो तिकरण दुकरणा य ॥४१

ततस्त्रीन्द्रियपर्याप्तेभ्योऽपर्याप्ताः पञ्चेन्द्रिया असङ्ख्येयगुणाः, एकस्मिन् प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्। तेभ्योऽपर्याप्तचतुरिन्द्रियाः, तेभ्यस्त्रीन्द्रिया अपर्याप्ताः, तेभ्योऽपर्याप्ता द्वीन्द्रियाः यथोत्तरं विशेषाधिका वाच्याः; प्रभूतप्रभूततरप्रभूततमप्रतराङ्गुलासङ्ख्येयभागखण्डप्रमाणत्वात्॥ ४१ ॥

एगक्ख अपज्जत्ता अणंतगुण सिंदिया य तेहहिया।
पज्जत्ता एगक्खा संखिज्जा सिंदिआ अहिया ॥४२॥

तेभ्य एकेन्द्रिया अपर्याप्ता अनन्तगुणाः, वनस्पतिकायिकानामपर्याप्तानामनन्ततया सदा प्राप्यमाणत्वात्। तेभ्यः सेन्द्रिया अपर्याप्ता विशेषाधिकाः, द्वीन्द्रियादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्। तेभ्यः पर्याप्ता एकेन्द्रियाः सङ्ख्येयगुणाः। तेभ्यः सेन्द्रियाः पर्याप्ता विशेषाधिकाः॥ ४२ ॥ एतद्गाथात्रयोक्तभावनाय गाथाचतुष्कमाह—

अप्पाउ चउकरणा पज्जत्ता ते चिरं न जीवंति।
तेण पणिंदियपज्जत्तयाण थेव त्ति ते भणिया ॥४३॥

तेइंदियाण ते पुण थोवा बेइंदिय त्ति पज्जत्ता।
तत्थ न वुत्ता जुत्ती वित्तीकारेण किं भणिमो ॥४४॥

एगिंदिय अपज्जत्ता थोवा पज्जत्तया य संखगुणा।
सुहुमे पडुच्च एयं इयरे बहुया अपज्जत्ता ॥ ४५ ॥

जं भणियं पज्जत्तयनिस्साए वक्कमंतपज्जत्ता ।
जत्थेगो पज्जत्तो तत्थ असंखा अपज्जत्ता ॥ ४६ ॥
दारं ३ ॥

थोवा १ य असंखगुणा २,
तिन्नि य अहिया ५ अणंत ७ दो अहिया ।
तस १ तेउ २ पुढवि ३ आऊ ४,
वाउ ५ अकाया ६ तरु ७ सकाया ८ ॥४७॥

सर्वस्तोकास्त्रसकायिकाः, द्वीन्द्रियादीनामेव त्रसकायिकत्वात्, तेषां च शेषकायापेक्षयाऽत्यल्पत्वात् १ । तेभ्यस्तेजस्कायिका असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात् २ । तेभ्यः पृथिवीकायिकाः, तेभ्योऽप्कायिकाः, तेभ्यो वायुकायिका यथोत्तरं प्रभूतप्रभूततरप्रभूततमासङ्ख्येयलोकाकाशप्रदेशमानत्वाद्विशेषाधिकाः ५ । तेभ्योऽकायिका अनन्तगुणाः, सिद्धानामनन्तत्वात् ६ । तेभ्यो वनस्पतिकायिका अनन्तगुणाः, अनन्तलोकाकाशप्रदेशराशिमानत्वात् ७ । तेभ्यः सकायिका विशेषाधिकाः, पृथिव्यादीनामपि तत्र प्रक्षेपात् ८ ॥ ४७ ॥ ओघेनोक्तं कायिकानामल्पबहुत्वम् । इदानीं विशेषेणाह—

थोवा तेऊ बायर पज्जत्ता १ ते तओ त एव तसा २ ।
अपज्जत्ता य तसा ३ पज्जत्ता तह परित्ततरू ४ ॥४८

निग्गोय ५ भू ६ जला ७,
निल ८ अप्पज्जत्तागणी ९ परित्ततरू १० ।
निग्गोय ११ भू १२ जला १३ निल १४,
सुहुमाऽगणिणो १५ असंखगुणा ॥ ४९ ॥
तत्तो य अपज्जत्ता सुहुमा भू १६,
जल १७ समीरणा १८ अहिया ।
तेऊ पज्जत्ता संखगुणा १९ भू २०,
जल २१ निला २२ अहिया ॥ ५० ॥
अप्पज्जत्त निगोया २३,
[1]असंखगुणिया त एव पज्जत्ता २४ ।
संखिज्जगुणा बायर-
पज्जत्तवणा २५ अणंतगुणा ॥ ५१ ॥
बायरपज्जत्त जिया २६,
अहिया तरु २७ बायरा अपज्जत्ता ।
असंखगुणा बायर-
अप्पज्जत्ता जिया २८ अहिया ॥ ५२ ॥
तरु २९ अपजत्ता सुहुमा,
असंख सुहुमा ३० ऽहिया अपज्जत्ता ।
सुहुमा तरु ३१ पज्जत्ता
संखाहिय सुहुम ३२ पज्जत्ता ॥५३॥दारं ४॥

---

१. "अस्संखगुणा" इत्यपि ।

सर्वस्तोका बादरतेजस्कायिकाः पर्याप्ताः, आवलिकासमयवर्गे कतिपयसमयन्यूनैरावलिकासमयैर्गुणिते यावान् समयराशिस्तावत्प्रमाणत्वात् तेषाम् १। तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषाम् २। तेभ्यो बादरत्रसकायिका अपर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषाम् ३। ततः प्रत्येकबादरवनस्पतिकायिकाः ४ बादरनिगोदाः ५ बादरपृथिवीकायिकाः ६ बादराप्कायिकाः ७ बादरवायुकायिकाः ८ पर्याप्ता यथोत्तरमसङ्ख्येयगुणाः। यद्यप्येते प्रत्येकं प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणास्तथाप्यङ्गुलासङ्ख्येयभागस्यासङ्ख्येयभेदभिन्नत्वादित्थं यथोत्तरमसङ्ख्येयगुणत्वमभिधीयमानं न विरुध्यते ८। तेभ्यो बादरतेजस्कायिका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात् ९। ततः प्रत्येकशरीरबादरवनस्पतिकायिकाः १० बादरनिगोदाः ११ बादरपृथिवीकायिकाः १२ बादराप्कायिकाः १३ बादरवायुकायिकाः १४ अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः। ततो बादरवायुकायिकेभ्योऽपर्याप्तेभ्यः सूक्ष्मतेजस्कायिका अपर्याप्ता असङ्ख्येयगुणाः १५। ततः सूक्ष्मपृथिवीकायिकाः १६ सूक्ष्माप्कायिकाः १७ सूक्ष्मवायुकायिकाः १८ अपर्याप्ता यथोत्तरं विशेषाधिकाः। ततः

सूक्ष्माः पर्याप्तास्तेजस्कायिकाः सङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघत एव सङ्ख्येयगुणत्वात् १६ ततः सूक्ष्मपृथिवीकायिकाः २० सूक्ष्माप्कायिकाः २१ सूक्ष्मवायुकायिकाः २२ पर्याप्ता यथोत्तरं विशेषाधिकाः। तेभ्यः सूक्ष्मनिगोदा अपर्याप्ता असङ्ख्येयगुणाः, तेषामपि प्राभूत्येन लोके सर्वस्मिन् भावात् २३। तेभ्यः सूक्ष्मनिगोदाः पर्याप्तकाः सङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघत एव सदा सङ्ख्येयगुणत्वात्। एते च बादरापर्याप्ततेजस्कायिकादयः पर्याप्तसूक्ष्मनिगोदपर्यवसानाः षोडश पदार्था यद्यप्यन्यत्राविशेषेणासङ्ख्येयलोकाकाशप्रदेशप्रमाणतया संगीयन्ते, तथाप्यसङ्ख्येयत्वस्यासङ्ख्येयभेदभिन्नत्वादित्थमसङ्ख्येयगुणत्वं विशेषाधिकत्वं सङ्ख्येयगुणत्वं विशेषाधिकत्वमसङ्ख्येयगुणत्वं सङ्ख्येयगुणत्वं प्रतिपाद्यमानं न विरोधभागिति २४। तेभ्यः पर्याप्तसूक्ष्मनिगोदेभ्यो बादरवनस्पतिकायिकाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैककनिगोदमनन्तजीवानां भावात् २५। तेभ्यः सामान्यतो बादरपर्याप्ता विशेषाधिकाः, बादरपर्याप्ततेजस्कायिकादीनामपि तत्र प्रक्षेपात् २६। तेभ्यो बादरवनस्पतिकायिका अपर्याप्तका असङ्ख्येयगुणाः, एकैकपर्याप्तबादरनिगोदनिश्रयाऽसङ्ख्येयानां बादरनिगोदापर्याप्तानामुत्पादात् २७। तेभ्यः सामान्यतो बादरापर्याप्तका विशेषाधिकाः, बादरतेजस्कायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात् २८। तेभ्यः

सामान्यतो बादरा विशेषाधिकाः, पर्याप्तानामपि तत्र प्रक्षेपात् । इदं चात्र संग्रहिण्यामसंगृहीतमपि सूत्रोक्तत्वाद्गम्यम् २९ । तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामपर्याप्तानामप्यसङ्ख्येयगुणत्वात् ३० । ततः सामान्यतः सूक्ष्मापर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवीकायिकादीनामप्यपर्याप्तकानां तत्र प्रक्षेपात् ३१ । तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मवनस्पतिकायिकापर्याप्तेभ्यो हि सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः सूक्ष्मेष्वोघतोऽपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणत्वात् । तेन सूक्ष्मापर्याप्तेभ्योऽपि सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः विशेषाधिकत्वस्य सङ्ख्येयगुणत्वबाधनायोगात् ३२ । तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, पर्याप्तसूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ३३ । ततः सामान्यतः सूक्ष्माः पर्याप्तापर्याप्तविशेषणरहिता विशेषाधिकाः, अपर्याप्तानामपि तत्र प्रक्षेपात् । एतेऽप्यत्रासंगृहीता सूत्रोक्तत्वाल्लिखिताः ३४ ॥ ४८–५३ ॥ द्वारम् ॥ ४ ॥

मणजोगीण असंखा
वयजोगि अजोगिणो अणंतगुणा ।
तणुजोगिणो अणंता
विसेसअहिया सजोगि त्ति ॥ ५५ ॥

जइ वि निगोयजियाणं णंताणोदीरिया तणू एगा ।
तह विहु कम्मणजोगा तणुजोगीणं अणंतत्तं ॥५५॥
केवलतणुजोगीसुं मणवयजोगेहिं खित्तएहिं तु ।
हुंति सजोगीजीवा पुव्वेहिंतो विसेसहिया ॥ ५६ ॥
दारं ५ ॥

सर्वस्तोका मनयोगिनः । संज्ञिनः पर्याप्ता एव हि मनोयोगिनः, ते च स्तोका इति । तेभ्यो वाग्योगिनोऽसङ्ख्येयगुणाः, द्वीन्द्रियादीनां वाग्योगिनां संज्ञिभ्योऽसङ्ख्यातगुणत्वात् । तेभ्योऽयोगिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात् । तेभ्यः काययोगिनोऽनन्ताः, वनस्पतिकायिकानामनन्तत्वात् । यद्यपि निगोदजीवानामनन्तानामेकं शरीरं तथापि तेनैकेन शरीरेण सर्वेऽप्याहारादिग्रहणं कुर्वन्तीति सर्वेषामपि काययोगित्वान्नानन्तगुणत्वव्याघात इति वृत्तिकारोक्तो हेतुः । तेभ्यः सामान्यतः सयोगिनो विशेषाधिकाः, द्वीन्द्रियादीनामपि वाग्योगिकादीनां तत्र प्रक्षेपात् ५ ॥ ५४–५६ ॥ द्वारम् ५ ॥

पुरिसेहिंतो थीओ संखगुणा णंतया अवेया उ ।
संढा उ अणंतगुणा विसेसअहिया सवेया उ ॥ ५७ ॥

सर्वस्तोकाः पुरुषवेदाः, संज्ञिनामेव तिर्यग्मनुष्याणां देवानां, च पुरुषवेदभावात् । तेभ्यः स्त्रीवेदाः सङ्ख्येयगुणाः । अवेदका अनन्तगुणाः, सिद्धानामनन्तत्वात् । तेभ्यो नपुं-

सकवेदा अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात् । सामान्यतः सवेदा विशेषाधिकाः, स्त्रीवेदकपुंवेदकानामपि तत्र प्रक्षेपात् ॥ ५७ ॥

पुरुषेभ्यः स्त्रीणां विशेषाधिकभावनायाह—

तिगुणा तिरूवअहिया
तिरियाणं इत्थिया मुणेयव्वा ।
सत्तावीसगुणा पुण
मणुयाणं तदहिया चेव ॥ ५८ ॥

बत्तीसगुणा बत्तीसरूवअहिया य तह य देवाणं ।
देवीओ इइ वुत्तं सुत्ते जीवाभिगमनामे ॥ ५९ ॥

दारं ६ ।

अकसाई अइथोवा माणकसाई तओ अणंतगुणा ।
कोही माई लोही सकसाई तह विसेसहिया ॥ ६० ॥

गयरागा अकसाई तेणं ते अप्पय त्ति तेहिंतो ।
छक्काएसु वि भावा माणकसाई अणंतगुणा ॥ ६१ ॥

न उ सत्तामित्तेणं सकसायित्तं इहं अहिप्पेअं ।
किंतु तहापरिणामो स हि माणे अप्पकालीणो ॥६२॥

सेसाणं परिणामो जहुत्तरं होइ बहुअकालीणो ।
तेण जहुत्तं सव्वं कसायसुत्तं तु निरवज्जं ॥ ६३ ॥

दारं ७ ।

अकषायिणोऽतिस्तोकाः, सिद्धानां कतिपयानां च मनुष्याणामकषायित्वात् । तेभ्यो मानकषायिणो मानकषायपरिणामवन्तोऽनन्तगुणाः, षट्स्वपि जीवनिकायेषु मानकषायपरिणामस्यावाप्यमानत्वात् । तेभ्यः क्रोधकषायिणो विशेषाधिकाः तेभ्यो मायाकषायिणो विशेषाधिकाः । तेभ्योऽपि लोभकषायिणो विशेषाधिकाः, मानकषायपरिणामकालापेक्षया क्रोधादिकषायपरिणामकालस्य यथोत्तरं विशेषाधिकतया क्रोधादिकषायाणामपि यथोत्तरं विशेषाधिकत्वात् । लोभकषायिभ्यः सामान्यतः सकषायिणो विशेषाधिकाः, मानादिकषायाणामपि तत्र प्रक्षेपात् । सकषायिण इत्यत्रैवं व्युत्पत्तिः—सह कषायेण कषायोदयेन वर्तन्ते ते सकषायोदयाः, विपाकावस्थां प्राप्ताः कषायकर्मपरमाणवः । तेषु सत्सु जीवस्यावश्यं कषायोदयसंभवात् । सकषाया विद्यन्ते येषां ते सकषायिणः कषायोदयसहिता इत्यर्थः ॥ ६०—६३ ॥ द्वारम् ७ ॥

सुक्का १ पम्हा २ तेऊ ३,
अल्लेसा ४ काउ ५ नील ६ किण्हा ७ य ।
थोवा १ दो संखगुणा ३,
दोऽणंता ५ दो विसेसहिया ७ ॥ ६४ ॥

इह लंतगाइदेवा कम्मगनरतिरिगसंखवासाऊ ।
केइ वि सुक्किललेसा थोवा तो सुक्कलेस त्ति ॥ ६५ ॥

इत्तो उ पम्हलेसा बहुया जेणं तु लंतगाईणं ।
देवाणं संखगुणा सणंकुमाराइणो देवा ॥ ६६ ॥
चोएइ असंखगुणा तेऊलेसा कहं न हुज्जेह ।
ताराउ असंखगुणा भवणवईण वि जओ भणिया ॥६७॥
किं पुण सणंकुमारगमाईदेवाण ते अ किल भणिया ।
तेऊलेसाइजुया एयं तु न संगयं जम्हा ॥ ६८ ॥
लेसासुत्ते वुत्तं इत्थीणं पम्हलेसजुत्ताणं ।
तेऊलेसा इत्थी हवंति संखिज्जगुणियाओ ॥ ६९ ॥
तिरियाणं जोइसिया संखेयगुणा य दंडए वुत्ता ।
ता कह पम्हगलेसाहिंतो तेऊ असंखगुणा ॥ ७० ॥

दारं ८ ।

सर्वस्तोकाः शुक्ललेश्याः, लान्तकादिष्वेवानुत्तरपर्यवसानेषु वैमानिकेषु देवेषु कतिपयेषु च गर्भव्युत्क्रान्तिषु कर्मभूमिकेषु सङ्ख्येयवर्षायुष्केषु मनुष्येषु तिर्यक्स्त्रीपुंनपुंसकेषु कतिपयेषु सङ्ख्येयवर्षायुष्केषु तस्याः संभवात् । तेभ्यः पद्मलेश्याकाः सङ्ख्येयगुणाः, सा हि पद्मलेश्या सनत्कुमारमाहेन्द्रब्रह्मलोककल्पवासिषु देवेषु तथा प्रभूतेषु गर्भव्यतिक्रान्तिकेषु कर्मभूमिजेषु सङ्ख्येयवर्षायुष्केषु मनुष्यस्त्रीपुंसकेषु तथा गर्भजतिर्यग्योनिकस्त्रीपुंसेषु सङ्ख्येयवर्षायुष्केष्वाप्यते । सनत्कुमारादिदेवादयश्च समुदिता लान्तकदेवादिभ्यः सङ्ख्येय-

गुणा इति भवन्ति शुक्ललेश्याकेभ्यः पद्मलेश्याकाः सङ्ख्येयगुणाः । तेभ्यस्तेजोलेश्याकाः सङ्ख्येयगुणाः, सर्वेषां सौधर्मेशानज्योतिष्कदेवानां कतिपयानां च भवनपतिव्यन्तरगर्भजतिर्यक्पञ्चेन्द्रियमनुष्याणां बादरापर्याप्तैकेन्द्रियाणां च तेजोलेश्याभावात् । नन्वसङ्ख्येयगुणाः कस्मान्न भवन्ति ?, कथं भवन्तीति चेदुच्यते, इह ज्योतिष्का भवनवासिभ्योऽप्यसङ्ख्येयगुणाः किं पुनः सनत्कुमारादिदेवेभ्यस्ते च ज्योतिष्कास्तेजोलेश्याकास्तथा सौधर्मेशानकल्पदेवाश्च ततः प्राप्नुवन्त्यसङ्ख्येयगुणाः, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात् लेश्यापदे हि गर्भजतिर्यग्योनिकानां संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकानां च कृष्णलेश्याद्यल्पबहुत्वे सूत्रं वक्ष्यति—"सव्वत्थोवा गब्भवक्कंतियतिरिक्खजोणिया सुक्कलेसातिरिक्खजोणिणीओ संखिज्जगुणाओ । पम्हलेसागब्भवक्कंतियतिरिक्खजोणिया संखेज्जगुणा तिरिक्खजोणिणीओ संखिज्जगुणाओ । तेउलेसागब्भवक्कंतियतिरिक्खजोणिया संखिज्जगुणा तेउलेसाओ तिरिक्खजोणिणीओ संखिज्जगुणाओ ।" इति महादण्डके च तिर्यग्योनिकस्त्रीभ्यो व्यन्तरा ज्योतिष्काश्च सङ्ख्येयगुणा वक्ष्यन्ते । ततो यद्यपि भवनवासिभ्योऽप्यसङ्ख्येयगुणा ज्योतिष्कास्तथापि पद्मलेश्याकेभ्यस्तेजोलेश्याकाः संख्येयगुणा एव । इदमत्र तात्पर्यम्—यदि केवलान् देवानेव पद्मलेश्या-

कानधिकृत्य देवा एव तेजोलेश्याकाश्चिन्त्यन्ते ततो भवन्त्य-सङ्ख्ये यगुणाः । यावता तिर्यक्सम्मिश्रया पद्मलेश्याकेभ्यस्तिर्यक्सम्मिश्रा एव तेजोलेश्याकाश्चिन्त्यन्ते ते तिर्यञ्चश्च पद्मलेश्या अप्यतिबहवस्ततः सङ्ख्ये यगुणा एव लभ्यन्ते नासंङ्ख्ये यगुणा इति । तेभ्योऽलेश्याका अनन्तगुणाः, सिद्धानामनन्तत्वात् । तेभ्यः कापोतलेश्या अनन्तगुणाः, वनस्पतिकायिकानामपि कापोतलेश्यायाः संभवात्, वनस्पतिकायानां च सिद्धेभ्यो-ऽप्यनन्तत्वात् । तेभ्योऽपि नीललेश्या विशेषाधिकाः, प्रभू-ततराणां नीललेश्यासंभवात् । तेभ्योऽपि कृष्णलेश्याका विशेषाधिकाः प्रभूततमानां कृष्णलेश्याकत्वात् । तेभ्यः सामान्यतः सलेश्या विशेषाधिकाः, नीललेश्यादीनामपि तत्र प्रक्षेपात् ॥ ६४–७० ॥ द्वारम् ८ ॥

सम्मामिच्छदिट्ठीहिंतो सम्मत्तिणो अणंतगुणा ।
तत्तो मिच्छदिट्ठी अणंतगुणिया मुणेयव्वा ॥७१॥९॥

सर्वस्तोकाः सम्यग्मिथ्यादृष्टयः, सम्यग्मिथ्यादृष्टिपरिणाम-कालस्यान्तर्मुहूर्त्तप्रमाणत्वादतिस्तोकत्वेन तेषां पृच्छासमये स्तोकानामेव तत्र लभ्यमानत्वात् । तेभ्यः सम्यग्दृष्टयोऽन-न्तगुणाः, सिद्धानामनन्तत्वात् । तेभ्योऽपि मिथ्यादृष्टयोऽन-न्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तत्वात् तेषां च मिथ्यादृष्टित्वात् ॥ ७१ ॥ द्वारम् ९ ॥

मणनाणीणं ओहिन्नाणि असंखा तओ मइ सुया उ ।
तुल्ला उ विसेसहिया विभंगनाणी असंखगुणा ॥७२॥
तेहिंतो केवलिणो अणंतगुणिया उ हुंति तेहिंतो ।
हुंति अणंता दो वि हु मइसुअन्नाणिणो तुल्ला ॥७३॥१०॥

सर्वस्तोका मनःपर्यवज्ञानिनः, संयतानामेवामर्षौषध्यादिऋद्धिप्राप्तानां मनःपर्यवज्ञानसम्भवात् । तेभ्योऽसङ्ख्येयगुणा अवधिज्ञानिनः, नैरयिकतिर्यक्पञ्चेन्द्रियमनुष्याणामेवावधि[1]ज्ञानविकलानामपि सम्भवात् । तेभ्यो मतिश्रुतज्ञानिनो विशेषाधिकाः, संज्ञितिर्यक्पञ्चेन्द्रियमनुष्याणामेवावधिज्ञानविकलानामपि केषाञ्चिन्मतिश्रुतज्ञानभावात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः । तेभ्योऽसङ्ख्येयगुणा विभङ्गज्ञानिनः, सुरनरकेषु सम्यग्दृष्टिभ्यो मिथ्यादृष्टयो विभङ्गज्ञानिनोऽसङ्ख्येयगुणाः ॥ ७२ ॥ तेभ्यः केवलिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात् । तेभ्यो मत्यज्ञानिनः श्रुताज्ञानिनश्चानन्तगुणाः, वनस्पतीनामपि मत्यज्ञानश्रुताज्ञानभावात् [2]तेषां चानन्तत्वात् । स्वस्थाने तु परस्परं तुल्याः ॥ ७३ ॥ द्वारम् १० ॥

थोवा उ ओहिदंसी चक्खुदंसी भवे असंखिज्जा ।
केवलदंसि अणंता अचक्खुदंसी अणंतगुणा ॥ ७४ ॥
॥ दारं ११ ।

---

१. "मनुष्यदेवानामपि तत्सम्भवात्" इति प्रज्ञापनावृत्तिपाठः ।
२. वनस्पतीनामित्यर्थः ।

सर्वस्तोका अवधिदर्शिनः, देवनैरयिकाणां कतिपयानां च संज्ञिपञ्चेन्द्रियतिर्यङ्मनुष्याणामवधिदर्शनभावात् । तेभ्यश्चक्षुर्दर्शिनोऽसङ्ख्येयगुणाः, सर्वेषां देवनैरयिकगर्भजमनुष्याणां संज्ञितिर्यक्पञ्चेन्द्रियाणामसंज्ञितिर्यक्पञ्चेन्द्रियाणां चतुरिन्द्रियाणां च चक्षुर्दर्शनभावात् । तेभ्यः केवलदर्शिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात् । तेभ्योऽचक्षुर्दर्शिनोऽनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तत्वात् ॥ ७४ ॥ द्वारम् ११ ॥

थोव त्ति संजया तह य संजयाऽसंजया असंखगुणा ।
पडिसेहत्तियरूवा सिद्धाऽणंता अविरया य ॥ ७५ ॥
॥ दारं १२ ॥

सर्वस्तोकाः संयताः, उत्कृष्टपदेऽपि तेषां कोटिसहस्रपृथक्त्वप्रमाणतया लभ्यमानत्वात् । तेभ्यः संयतासंयता देशविरता असङ्ख्येयगुणाः, तिर्यक्पञ्चेन्द्रियाणामसङ्ख्यातानां देशविरतिसद्भावात् । तेभ्यो नोसंयता नोअसंयता नोसंयतासंयता अनन्तगुणाः, प्रतिषेधत्रयवृत्ता हि सिद्धास्ते चानन्ता इति । तेभ्योऽसंयता अनन्तगुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तत्वात् ॥ ७५ ॥ द्वारम् १२ ॥

अणगारुवउत्ताणं सागारुवओगिणो उ संखगुणा ।
दंसणवओगकालो थोवो जं इयर इयरु त्ति ॥ ७६ ॥
॥ दारं १३ ॥

अनाकारोपयुक्तेभ्यः साकारोपयुक्ताः सङ्ख्येयगुणाः, यतोऽनाकारोपयोगकालः सर्वस्तोकोऽतस्ते पृच्छासमये स्तोका एव प्राप्यन्ते। इतरः साकारोपयोगकाल इतरो दीर्घ इति पृच्छासमये साकारोपयोगिनो बहवः प्राप्यन्तेऽतस्ते सङ्ख्यातगुणाः॥ ७६ ॥ द्वारम् १३ ॥

थोवाणाहारजिया तत्तो आहारगा असंखगुणा।
विग्गहगइणो जम्हा णाहारा तेण ते थोवा ॥ ७७ ॥
अंतोमुहुत्तसमयप्पमाणया विग्गहम्मि वट्टंति।
सुहुमनिगोआ उ जिया तेहिं हीणा उ सेसजिया॥७८
ते विग्गहो निगोआ णाहारा [1]पढमविग्गहं मुत्तं।
सेस अविग्गहवित्ती अस्संखाहारगा ते य ॥ ७९ ॥
॥ दारं १४ ॥

सर्वस्तोका अनाहारका जीवाः, विग्रहगत्यापन्नादीनामेवानाहारकत्वात्। उक्तं च—"**विग्गहगइमावन्ना केवलिणो समुहया अजोगी य। सिद्धा य अणाहार सेसा आहारगा जीवा।**" इत्यादि। तेभ्य आहारका असङ्ख्येयगुणाः। ननु वनस्पतिकायानां सिद्धेभ्योऽप्यनन्तत्वात्तेषां

---

१. यत एकवक्रायां गतौ समयद्वयेऽप्याहारक एव। आद्यसमये प्राग्भवस्याहारः। द्वितीयसमये परभवस्य। अतः प्रथमविग्रहं मुक्त्वेत्युक्तम्।

चाहारकतया लभ्यमानत्वात् कथमनन्तगुणा न भवन्ति ?, तदयुक्तम्, वस्तुतत्त्वापरिज्ञानात्। इह सूक्ष्मनिगोदाः सर्वासङ्ख्ययाप्यसङ्ख्येयाः। तत्राप्यन्तर्मुहूर्त्तसमयराशितुल्याः सूक्ष्मनिगोदाः सर्वकालं विग्रहे वर्त्तमाना लभ्यन्ते। ततोऽनाहारका अप्यतिबहवः। सकलजीवराश्यसङ्ख्येयभागतुल्या इति। तेभ्य आहरका असङ्ख्येयगुणा एव नानन्तगुणा भवन्तीति भावः ॥ ७७–७९ ॥ द्वारं १४।

भासगजोवेहिन्तो अभासगा हुंति णंतगुणिया उ।
॥ दारं १५।

सर्वस्तोका भाषका भाषालब्धिं सम्पन्नाः, द्वीन्द्रियादीनामेव भाषकत्वात्। तेभ्योऽभाषका भाषालब्धिहीना अनन्तगुणाः, वनस्पतिकायिकानामनन्तत्वात्। द्वारम् १५।

नो अपरित्तपरित्ता परित्तया णंतगुणिया उ ॥ ८० ॥
अपरित्ता णंतगुणा तत्थ परित्ता हवंति दुविहा उ।
कायपरित्ता एगे अन्ने पुण भवपरित्त त्ति ॥ ८१ ॥
पत्तेअतणूकाया परित्तया,
सुक्कपक्खिया इयरे ॥ दारं १६ ॥

इह परीत्ता द्विविधा, भवपरीत्ताः कायपरीत्ताश्च। तत्र भवपरीत्ता येषां किञ्चिदूनापार्द्धपुद्गलपरावर्त्तमात्रसंसारः। कायपरीत्ताः प्रत्येकशरीरिणः। तत्रोभयेऽपि परीत्ताः सर्वस्तोकाः,

शुक्लपाक्षिकाणां प्रत्येकशरीरिणां वाशेषजीवापेक्षयातिस्तोकत्वात् । ततो नोपरीत्ता नोअपरीत्ता उभयप्रतिषेधवृत्ता हि सिद्धा अनन्तगुणाः ॥ ८० ॥ तेभ्योऽपरीत्ता अनन्तगुणाः, कृष्णपाक्षिकाणां साधारणवनस्पतिकायानां वा सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥ ८१ ॥ द्वारम् १६ ॥

सिद्धाणमपज्जत्ता,
णंता पज्जत्तया संखा ॥ ८२ ॥ दारं १७ ॥

सर्वस्तोका नोपर्याप्तका नोऽपर्याप्तकाः, उभयप्रतिषेधवर्त्तिनो हि सिद्धाः, ते चापर्याप्तकादिभ्यः सर्वस्तोका इति । तेभ्योऽपर्याप्तका अनन्तगुणाः, साधारणवनस्पतीनां सिद्धेभ्योऽप्यनन्तगुणानां सर्वकालमपर्याप्तत्वेन लभ्यमानत्वात् । तेभ्यः पर्याप्ताः सङ्ख्येयगुणाः । इह सर्वबहवो जीवा सूक्ष्माः । सूक्ष्माश्च सर्वकालमपर्याप्तेभ्यः पर्याप्ताः सङ्ख्येयगुणा इति ॥ ८२ ॥ द्वारम् १७ ॥

नोसुहुमबायराणं बायरगा हुंत णंतगुणिया उ ।
सुहुमा असंखगुणिया सुहुमनिगोए पडुच्चेवं ॥८३॥
दारं १८ ॥

सर्वस्तोका नोसूक्ष्मा नोबादरा जीवाः सिद्धा इत्यर्थः, तेषां सूक्ष्मबादरजीवराशेरनन्तभागकल्पत्वात् । तेभ्यो बादरा अनन्तगुणाः, बादरनिगोदजीवानां सिद्धेभ्योऽप्यनन्तगुण-

त्वात् । तेभ्यः सूक्ष्मा असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामसङ्ख्येयगुणत्वात् ॥ ८३ ॥ द्वारम् १८ ॥

सन्नी थोवा सिद्धा,
णंता अस्सन्निणो अणंतगुणा ॥ दारं १९ ॥

सर्वस्तोकाः संज्ञिनः, समनस्कानामेव संज्ञित्वात् । तेभ्यो नोसंज्ञिनो नोऽसंज्ञिनोऽनन्तगुणाः, उभयप्रतिषेधवृत्ता हि सिद्धास्ते च संज्ञिभ्योऽनन्तगुणा एवेति । तेभ्योऽसंज्ञिनोऽनन्तगुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥ द्वारम् १९

अब्भव्वाणं सिद्धा,
णंतगुणा णंतया भव्वा ॥८४॥ दारं २० ॥

सर्वस्तोका अभवसिद्धिका अभव्याः, जघन्ययुक्तानन्तपरिमाणत्वात् । तेभ्यो नोभवसिद्धिका नोऽभवसिद्धिकाः सिद्धाः अनन्तगुणाः, अजघन्योत्कृष्टयुक्तानन्तकपरिमाणत्वात् । तेभ्यो भव्या अनन्तगुणाः, यतो भव्यनिगोदस्यैकस्यानन्तभागकल्पाः सिद्धाः, भव्यजीवराशिनिगोदाश्चासङ्ख्येया लोक इति ॥ ८४ ॥ द्वारम् २० ॥

धम्माधम्मागासा इक्किक्का दव्वयाइ ते थोवा ।
धम्माधम्माय[1] समा पएसओ ते असंखगुणा ॥८५॥

१. "म्मागासा" इत्यपि पाठः ।

जीवा दव्वा णंता ते चेव पएसओ असंखगुणा ।
पुग्गलदव्वा णंता पएसओ ते असंखगुणा ॥ ८६ ॥
अद्धासमया णंता
नहप्पएसा, तओ अणंतगुणा ॥ दारं २१ ॥

धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकाया एते त्रयोऽपि द्रव्यार्थतया, द्रव्यमेवार्थो द्रव्यार्थस्तस्य भावो द्रव्यार्थता तया द्रव्यरूपतयेत्यर्थः, तुल्या समाः प्रत्येकमेकैकसङ्ख्याकत्वात्, अत एव सर्वस्तोकाः ३ । तेभ्यो धर्मास्तिकायाधर्मास्तिकायौ प्रदेशार्थतयाऽसङ्ख्येयगुणौ, परस्परं तुल्यौ, द्वयोरपि लोकाकाशप्रदेशप्रमाणप्रदेशत्वात् ५ । ताभ्यां जीवास्तिकायो द्रव्यार्थतयानन्तगुणः, जीवानां प्रस्तेकं द्रव्यत्वात् तेषां चानन्तत्वात् ६ । ततः स एव प्रदेशार्थतयाऽसङ्ख्येयगुणः, प्रतिजीवं लोकाकाशप्रदेशप्रमाणप्रदेशभावात् ७ । ततः पुद्गलास्तिकायो द्रव्यार्थतयाऽनन्तगुणः कथम् ?, इति चेदुच्यते—यत इह परमाणुद्विप्रदेशकादीनि पृथक्पृथग्द्रव्याणि, तानि च सामान्यतस्त्रिधा, प्रयोगपरिणतानि मिश्रपरिणतानि विस्रसापरिणतानि च । तत्र प्रयोगपरिणताण्येव [1]तावज्जीवप्रदेशेभ्योऽनन्तगुणानि । एकैकस्य जीवप्रदेशस्या-

---

१. "जीवेभ्योऽनन्तगुणानि । एकैकस्य जीवस्यानन्तैः" इति पाठः प्रज्ञापनाटीकायाम् ।

नन्तैः प्रत्येकं ज्ञानावरणीयादिकर्मपुद्गलस्कन्धैरावेष्टितत्वात्, किं पुनः शेषाणि ?। ततः प्रयोगपरिणतेभ्यो मिश्रपरिणतान्यनन्तगुणानि । तेभ्यो विस्रसापरिणतान्यगुणानि ८। तस्मादपि पुद्गलास्तिकायः स्व(सत्)द्रव्यापेक्षया प्रदेशार्थतया चिन्त्यमानोऽसङ्ख्येयगुणः। ननु कथं नानन्तगुणोऽनन्तप्रदेशकानामपि स्कन्धानां बहूनां भावात्, नैवं, स्वल्पा अनन्तप्रदेशकाः स्कन्धाः, परमाण्वादयस्त्वतिबहवः, तथा च वक्ष्यति सूत्रम्–"**सव्वत्थोवा अणंतप्पएसिया खंधा दव्वट्ठयाए। परमाणुपोग्गला दव्वट्ठयाए अणंतगुणा। संखिज्जपएसिया खंधा दव्वट्ठयाए संखिज्जगुणा। असंखिज्जपएसिया खंधा दव्वट्ठयाए असंखिज्जगुणा।**" इति। ततश्चात्रानन्तप्रदेशकानामतिस्तोकत्वात् परमाणूनां चातिबहुत्वात्तेषां च पृथक् पृथग्द्रव्यत्वादसङ्ख्येयप्रदेशकानां च स्कधानां परमाण्वपेक्षयाऽसङ्ख्येयगुणत्वादसङ्ख्येयगुण एवोपपद्यते पुद्गलास्तिकायः प्रदेशार्थतया नानन्तगुणः ९। तस्मादप्यद्धासमयो द्रव्यार्थतयाऽनन्तगुणः। कथम् ?, इति चेदुच्यते–इहैकस्यैव परमाणोरनागते काले, तत्तद्द्विप्रदेशक–त्र्यणुक–सङ्ख्याताऽणुक–असङ्ख्याताऽणुक–अनन्ताऽणुकस्कन्धान्तपरिणामतयाऽनन्ता भाविनः संयोगाः पृथक् पृथक् कालाः। यथा चैकस्य परमाणोस्तथा सर्वेषां प्रत्येकं द्व्यणुकादिस्कन्धानामनन्ताः संयोगाः पुरस्कृताः, सर्वे-

षामपि मनुष्यक्षेत्रान्तर्वर्त्तितया परिणामसम्भवात् । तथा क्षेत्रतोऽप्ययं परमाणुरमुष्मिन्नाकाशप्रदेशेऽमुष्मिन् कालेऽवगाहिष्यत इत्येवमनन्ता एकस्याणोर्भाविनः संयोगाः । यथैकस्याणोस्तथा सर्वेषां परमाणूनां तथा द्विप्रदेशकादीनामपि स्कन्धानामनन्ताणुपर्यन्तानां प्रत्येकं तत्तदेकप्रदेशाद्यवगाहभेदतो भिन्नभिन्नकाला अनन्ता भाविनः संयोगाः । तथा कालतोऽप्ययं परमाणुरमुष्मिन्नाकाशप्रदेशे एकसमयस्थितिको द्विसमयस्थितिक इत्येवमेकस्यापि परमाणोरेकस्मिन्नाकाशप्रदेशेऽसङ्ख्येया भाविनः संयोगाः । एवं सर्वेष्वपि आकाशप्रदेशेषु प्रत्येकमसङ्ख्येया भाविनः संयोगाः । ततो भूयो भूयस्तेष्वाकाशप्रदेशेषु परावृत्तौ कालस्यानन्त्वादनन्ताः कालतो भाविनः संयोगाः । यथा चैकस्याणोस्तथा सर्वेषामप्यणूनां सर्वेषां प्रत्येकं द्व्यणुकादीनां च । भावतोऽप्ययं परमाणुरमुष्मिन् काले एकगुणकालको द्विगुणकालको भावीत्येवमेकस्याप्यणोर्भिन्नभिन्नकाला अनन्ताः संयोगाः । यथा चैकस्याणोस्तथा सर्वेषामणूनां सर्वेषां च द्व्यणुकादीनां पृथक् पृथगनन्ता भावतः पुरस्कृताः संयोगाः । तदेवमेकस्याप्यणोर्द्रव्यक्षेत्रकालभावविशेषसम्बन्धवशादनन्ता भाविनोऽतीताश्च समया उपलब्धाः । यथैकस्याणोस्तथा सर्वेषामणूनां सर्वेषां च प्रत्येकं द्व्यणुकादीनां स्कन्धानाम् । न [1]चैतत्परिणामि-

१. कालानन्तत्वमित्यर्थः ।

कालवस्तुव्यतिरेके परिणामिपुद्गलास्तिकायादिव्यतिरेके चोपपद्यते । ततः सर्वमिदं तात्त्विकमवसेयम् । यथा सर्वेषां परमाणूनां सर्वेषां च द्व्यणुकादीनां स्कन्धानां प्रत्येकं द्रव्यक्षेत्रकालभावविशेषसम्बन्धवशादनन्ता भाविनोऽद्धासमयास्तथाऽतीता अपीति सिद्धः पुद्गलास्तिकायादनन्तगुणोऽद्धासमयो द्रव्यार्थतयेति । इह कालमाश्रित्य प्रदेशार्थतयाऽल्पबहुत्वविचारणा न कृता, कालप्रदेशानामभावात् । आह—कोऽयमद्धासमयानां द्रव्यार्थतानियमः ? यावता प्रदेशार्थतापि तेषां विद्यत एव । तथाहि—यथाऽनन्तानां परमाणूनां समुदायः स्कन्धो भण्यते । स च द्रव्यं तदवयवाश्च प्रदेशाः । तथेहापि सकलः कालो द्रव्यं तदवयवाश्च समयाः प्रदेशा इति । तदयुक्तम्, दृष्टान्तदार्ष्टान्तिकवैषम्यात् । परमाणूनां समुदायस्तदा स्कन्धो भवति यदा ते परस्परसापेक्षतया परिणमन्ते । परस्परनिरपेक्षाणां केवलपरमाणूनामिव स्कन्धत्वायोगात् । अद्धासमयास्तु परस्परनिरपेक्षा एव, वर्त्तमानसमयभावे पूर्वापरसमययोरभावात् । ततो न स्कन्धत्वपरिणामः, तदभावाच्च नाद्धासमयाः प्रदेशाः, किन्तु पृथग् द्रव्याण्येवेति १० । तस्मादप्यद्धासमयादाकाशास्तिकायः प्रदेशार्थतयाऽनन्तगुणः, सर्वास्वपि दिक्षु विदिक्षु च तस्यान्ताभावात्, अद्धासमयस्य च मनुष्यक्षेत्रमात्रभावात् ॥ ११ ॥ ८५—८६ ॥ द्वारम् २१ ॥

चरिमाउ अचरिमाणं,
पंतगुणा हुंति सिद्धसमा ॥ ८७ ॥
इह अचरिमा अभव्वा,
चरिमा पुण भावि चरमभवगहणा ।
ते सिद्धसमा तुल्ला,
जमईयाणागयद्धा य ॥ ८८ ॥ दारं २२ ॥

येषां चरमो भवः संभवी योग्यतयापि । ते चरमा उच्यन्ते ते चार्थाद्भव्याः । इतरेऽचरमा अभव्या सिद्धाश्च । उभयेषामपि चरमभवाभावात् । तत्र सर्वस्तोका अचरमाः, अभव्यानां च समुदितानामप्यजघन्योत्कृष्टयुक्तानन्तकपरिमाणत्वात् । तेभ्योऽनन्तगुणाश्चरमाः, अजघन्योत्कृष्टानन्तानन्तकपरिमाणत्वात् । 'इह' एतद्वाथोक्ता "जमईआणागयद्धा य" इति युक्तिरत्राधिकारे वृत्तौ न दृष्टेति ॥ ८७-८८ ॥ द्वारम् २२ ॥

जीवा १ पुग्गल २ समया ३,
दव्व ४ पएसा ५ य पज्जवा ६ चेव ।
थोवा १ णंता २ णंता ३,
विसेसमहिआ ४ दुवे णंता ६ ॥ ८९ ॥

इक्किक्को जियदेसो णंताणंतेहिँ कम्मगअणूहिं ।
परिवेढिउ त्ति तेणं जीवाणं पुग्गला णंता ॥ ९० ॥

दव्वाईभावाणं संबंधविसेसओ अणंताओ ।
हुंति हु अद्धासमया एगम्मि वि सुद्धअणुयंमि ॥९१॥

जमणंता वि हु समया दव्वाइं तेसि मज्झयारंमि ।
जीवाइपञ्च दव्वा छूढा तो बहुतरा दव्वा ॥ ९२ ॥

आगासाणंतत्ता दव्वपएसा भवंत णंतगुणा ।
पज्जवया वि अणंता पइप्पएसं जओ णंता ॥ ९३ ॥
॥ दारं २३ ॥

सर्वस्तोका जीवाः १ । तेभ्यः पुद्गला अनन्तगुणाः २ । तेभ्योऽद्धासमया अनन्तगुणाः ३ । अत्र भावना प्रागेवोक्ता । तेभ्योऽद्धासमयेभ्यः सर्वद्रव्याणि विशेषाधिकानि । कथम् ?, इति चेदुच्यते—इह येऽनन्तरमद्धासमयाः पुद्गलेभ्योऽनन्तगुणा उक्तास्ते प्रत्येकं द्रव्याणि, ततो द्रव्यचिन्तायां तेऽपि परिगृह्यन्ते । तेषु च मध्ये सर्वजीवद्रव्याणि सर्वपुद्गलद्रव्याणि धर्माधर्माकाशास्तिकायद्रव्याणि च प्रक्षिप्यन्ते, तानि च समुदितान्यद्धासमयानामनन्तभागकल्पानीति तेषु प्रक्षिप्तेष्वपि मनागधिकत्वं जातमित्यद्धासमयेभ्यः सर्वद्रव्याणि विशेषाधिकानि ४ । तेभ्यः सर्वप्रदेशा अन्तगुणाः, आकाशानन्तत्वात् ५ । तेभ्यः सर्वपर्यवा अनन्तगुणाः, एकैकस्मिन्नाकाशप्रदेशेऽनन्तानामगुरुलघुपर्यायाणां भावात् ॥ ८९–९३ ॥ द्वारम् २३ ॥

उड्ढतिरियंमि थोवा १
अहतिरिए हुंति तो विसेसहिआ २ ।
तिरियंमि असंखगुणा ३,
असंखगुणिया उ तेलोए ४ ॥ ९४ ॥
उड्ढंमि असंखगुणा ५,
जिआ विसेसाहिआ अहोलोए ६ ।
खित्तबहुत्तणेण य,
जहुत्तरं जीवबहुयत्तं ॥ ९५ ॥

तिरियलोयस्स उ अंतो आई उड्ढस्स पयरदुगमेयं ।
उड्ढतिरियं ति भिन्नइ एवं चिय होइ अहतिरियं ॥९६
समुघायविग्गहेहिं फुसंति जे देहिणो उ तियलोयं ।
तेलुक्कत्था ते इह भावत्थो वित्तिओ नेओ ॥ ९७ ॥

सर्वस्तोका ऊर्द्ध्वतिर्यग्लोके । इहोर्द्ध्वलोकस्य यदधस्तनमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वोपरितनमाकाशप्रदेशप्रतरमेष ऊर्द्ध्वतिर्यग्लोकः । इयमत्र भावना—इह सामस्त्येन चतुर्दशरज्ज्वात्मकलोकस्त्रिधा भिद्यते, ऊर्द्ध्वलोकः १ तिर्यग्लोकः २ अधोलोकश्च ३ । रुचकाच्चैतेषां विभागः, तथाहि—रुचकस्याधस्तान्नवयोजनशतानि रुचकस्योपरिष्टान्नवयोजनशतानि तिर्यग्लोकः, तस्याधस्तादधोलोकः, उपरिष्टादूर्ध्वलोकः । तत्र रुचकसमादूर्ध्वभागान्नवयोजनश-

तानि गत्वा ज्योतिश्चक्रस्योपरितनं तिर्यग्लोकसम्बन्धि एकप्रादेशिकमाकाशप्रतरं तिर्यग्लोकप्रतरं, तस्य चोपरि यदेकप्रादेशिकमाकाशप्रतरमूर्द्ध्वलोकप्रतरम्, एते च द्वे अप्यूर्द्ध्वतिर्यग्लोक इति व्यवहियेते। तत्र वर्त्तमाना जीवाः सर्वस्तोकाः। कथम्?, इह ये ऊर्द्ध्वलोकात्तिर्यग्लोके तिर्यग्लोकाद्वोर्द्ध्वलोके समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्ति, ये च तत्रस्था एव केचन तत्प्रतरद्वयाध्यासिनो वर्त्तन्ते ते किल विवक्षितप्रतरद्वये वर्त्तन्ते नान्ये। ये पुनरूर्द्ध्वलोकादधोलोके समुत्पद्यमानास्तत्प्रतरद्वयं स्पृशन्ति ते न गण्यन्ते, तेषां[1] त्रैलोक्यस्पर्शित्वात्। ततः स्तोका एवाधिकृतप्रतरद्वयवर्तिनो जीवाः। ननूर्द्ध्वलोकगतानामपि सर्वजीवानामसङ्ख्येयो भागोऽनवरतं म्रियमाणोऽवाप्यते, ते च तिर्यग्लोके समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्तीति कथमधिकृतप्रतरद्वयस्पर्शिनः स्तोकाः?, तदयुक्तं, यद्यप्यूर्द्ध्वलोकगतानां सर्वजीवानामसङ्ख्येयो भागोऽनवरतं म्रियमाणोऽवाप्यते तथापि न ते सर्व एव तिर्यग्लोके समुत्पद्यन्ते, प्रभूततराणामूर्द्ध्वलोकेऽधोलोके च समुत्पादादिति १।

तेभ्योऽधोलोकतिर्यग्लोके विशेषाधिकाः, इह यदधोलोकस्योपरितनमेकप्रादेशिकमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्या-

---

१. "तेषां सूत्रान्तरविषयत्वात्।" इति प्रज्ञापनाटीकायाम्।

धस्तनमेकप्रादेशिकमाकाशप्रदेशप्रतरं,एतद्द्वयमप्यधोलोकतिर्यग्लोक उच्यते। तत्र ये विग्रहगत्या तत्रस्थतया वा वर्त्तन्ते ते विशेषाधिकाः। कथम्?, इह येऽधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके इलिकागत्या समुत्पद्यमाना अधिकृतप्रतरद्वयं स्पृशन्ति, ये च तत्रस्था एव केचन तत्प्रतरद्वयमध्यासीना वर्त्तन्ते ते विवक्षितप्रतरद्वयवर्त्तिनः। ये पुनरधोलोकाद्ऊर्ध्वलोके उत्पद्यमानास्तत्प्रतरद्वयं स्पृशन्ति न ते गृह्यन्ते, तेषां[1] त्रैलोक्यस्पर्शित्वात्। केवलमूर्द्ध्वलोकादधोलोको विशेषाधिक इत्यधोलोकात्तिर्यग्लोक उत्पद्यमाना ऊर्द्ध्वलोकापेक्षया विशेषाधिकाः २।

तेभ्यस्तिर्यग्लोकवर्त्तिनोऽसङ्ख्येयगुणा इति, उक्तक्षेत्रद्विकात्तिर्यग्लोकक्षेत्रस्यासङ्ख्येयगुणत्वात् ३। तेभ्यस्त्रैलोक्यसंस्पर्शिनोऽसङ्ख्येयगुणाः, इह ये केवले ऊर्द्ध्वलोकेऽधोलोके तिर्यग्लोके वा वर्त्तन्ते, ये च विग्रहगत्योर्द्ध्वलोकतिर्यग्लोकावधोलोकतिर्यग्लोकौ वा स्पृशन्ति ते न गण्यन्ते। किन्तु ये विग्रहगत्यापन्नास्त्रीनपि लोकान् स्पृशन्ति ते परिग्राह्याः। ते च तिर्यग्लोकवर्त्तिभ्योऽसङ्ख्येयगुणा एव। कथम्?, इह बहवः प्रतिसमयमूर्द्ध्वलोकेऽधोलोके च सूक्ष्मनिगोदा उद्वर्त्तन्ते। ये तु तिर्यग्लोकवर्त्तिनः सूक्ष्मनिगोदा उद्वर्त्तन्ते तेऽधो-

---

१. "तेषां सूत्रान्तरविषयत्वात्।" इति प्रज्ञापनाटीकायाम्।

लोके उद्ध्वलोके वा केचित्तस्मिन्नेव वा तिर्यग्लोके समुत्पद्यन्ते ततो न ते लोकत्रयसंस्पर्शिनः । तत्रोद्ध्वलोकाधोलोकगतानां सूक्ष्मनिगोदानामुद्वर्त्तमानानां मध्ये केचित्स्वस्थान एवोद्ध्वलोकेऽधोलोके वा समुत्पद्यन्ते, केचित्तिर्यग्लोकेऽधोलोके वा । तेभ्योऽसङ्ख्येयगुणा अधोलोकगता ऊद्ध्वलोके ऊद्ध्वलोकगता अधोलोके वा समुत्पद्यन्ते, ते च तथोत्पद्यमाना स्त्रीनपि लोकान् स्पृशन्तीत्यसङ्ख्येयगुणा । कथं पुनरेतदेवमवसीयते ? यदुत एवंप्रमाणा बहवो जीवाः सदा विग्रहगत्यापन्ना लभ्यन्ते, इति चेदुच्यते युक्तिवशात्, तथाहि—प्रागुक्तं प्रज्ञापनायामेव पर्याप्तद्वारे—"**सव्वत्थोवा जीवा नोपज्जत्ता नोअपज्जत्ता सिद्धा, अपज्जत्ता अणंतगुणा, पज्जत्ता संखिज्जगुणा**" इति । तत एवं नामाऽपर्याप्ता बहवो येनैतेभ्यः पर्याप्ताः सङ्ख्येयगुणा एव नासङ्ख्येयगुणा नाप्यनन्तगुणाः । ते चापर्याप्ता बहवोऽन्तरगतौ वर्त्तमाना लभ्यन्ते ४ इति । तेभ्य ऊद्ध्वलोके ऊद्ध्वलोकावस्थिता असङ्ख्येयगुणाः, उपपातक्षेत्रस्यातिबहुत्वादसङ्ख्येयानां च भागानामुद्वर्त्तनायाः सम्भवात् ५ । तेभ्योऽधोलोकेऽधोलोकस्था विशेषाधिकाः, ऊद्ध्वलोकक्षेत्रादधोलोकक्षेत्रस्य विशेषाधिकत्वात् ६ ॥६७॥ तदेवं सामान्यतो जीवानां क्षेत्रानुपातेनाल्पबहुत्वमुक्तं, अथ चतुर्गतिदण्डकमेण तदाह—

भणियाण लोगभेयाण नारया चउत्थबीयछट्ठेसु ।
थोवा दोसु असंखा तिरिया जह ओहिया जीवा ॥९८

पूर्वोक्तानां षण्णां लोकभेदानां मध्ये चतुर्थद्वितीयषष्ठेषु लोकेषु जीवा यथासङ्ख्यं स्तोका असङ्ख्यातगुणाश्च । तत्र कथं लोकत्रयस्पर्शिनो नैरयिकाः ? कथं वा ते सर्वस्तोकाः ? इत्याह—इह ये मेरुशिखरेऽञ्जनदधिमुखपर्वतशिखरादिषु वा वापीषु वर्त्तमाना मत्स्यादयो नारकेषूत्पित्सव इलिकागत्या प्रदेशान् विक्षिपन्ति ते किल त्रैलोक्यमपि स्पृशन्ति, नारकव्यपदेशं च लभन्ते, तत्कालमेव नरकेषूत्पत्तेर्नारकायुष्कप्रतिसंवेदनात् । ते चेत्थम्भूताः सर्वस्तोकाः । अन्ये तु व्याचक्षते नारका एव यथोक्तवापीषु तिर्यक्पञ्चेन्द्रियतयोत्पद्यमानाः समुद्घातवशतो विक्षिप्तनिजात्मप्रदेशदण्डा अद्यापि कालमकुर्वन्तो जातमरणाः परिगृह्यन्ते । ते हि किल तदा नारका एव निर्विवादं तदायुष्कसंवेदनात् त्रैलोक्यस्पर्शिनश्च यथोक्तवापीर्यावदात्मप्रदेशदण्डस्य विक्षिप्तत्वादिति १ । तेभ्यः प्रतरद्वयरूपाधोलोकतिर्यग्लोकेऽसङ्ख्येयगुणाः । यतो मन्दरादिक्षेत्रादसङ्ख्येयगुणादसङ्ख्येयद्वीपसमुद्रात्मकक्षेत्रात्तिर्यक्पञ्चेन्द्रिया नरकेषूत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशन्ति । अन्ये त्वाहुः—नारका एवासङ्ख्येयेषु द्वीपसमुद्रेषु तिर्यक्पञ्चेन्द्रियतयोत्पद्यमाना मारणान्तिकसमुद्घातेन विक्षिप्तनिजात्मप्रदेश-

दण्डा द्रष्टव्याः। ते हि नारकायुर्वेदनान्नारका उद्वर्त्तमाना अप्यसङ्ख्येयगुणाः प्राप्यन्त इति २। तेभ्योऽधोलोकेऽसङ्ख्येयगुणाः, तस्य तेषां स्वस्थानत्वादधोलोकक्षेत्रस्यासङ्ख्येयत्वाच्च ३। तिरश्चां क्षेत्रतोऽल्पबहुत्वमौधिकजीववत् सूक्ष्मनिगोदानामुभयत्र भावात् ॥ ९८ ॥

पंचम १ पढम २ चउत्थे ३,
बीए ४ छट्ठे ५ तइज्ज ६ तिरियत्थी।
थोवा १ ऽसंखा २,
सेसा संखिज्जगुणा कमेणेव ॥ ९९ ॥

पञ्चमे ऊर्ध्वलोके तिर्यग्योनिकस्त्रियः सर्वस्तोकाः। इह मन्दरादिद्वापीप्रभृतिष्वपि हि पञ्चेन्द्रियतिर्यग्योनिकाः स्त्रियो भवन्ति, ताश्च क्षेत्रस्याल्पत्वात् सर्वस्तोकाः १। ताभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वयरूपे वर्त्तमाना असङ्ख्येयगुणाः। कथम् ?, यावत्सहस्रारदेवलोकस्तावद्देवा अपि गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रिययोनित्वेनोत्पद्यन्ते, किं पुनः शेषकायाः ? ते हि यथासङ्ख्यमुपरिवर्त्तिनोऽपि तत्रोत्पद्यन्ते। ततो ये सहस्रारान्ता देवा अन्येऽपि च शेषकाया ऊर्ध्वलोकात्तिर्यग्लोके तिर्यक्पञ्चेन्द्रियस्त्रीत्वेन तदायुःसंवेदयमाना उत्पद्यन्ते। यास्तिर्यग्लोकवर्त्तिन्यस्तिर्यक्पञ्चेद्रियस्त्रिय ऊर्ध्वलोके देवत्वेन शेषकायत्वेन वोत्पद्यमाना मारणान्तिकसमुद्घातेनोत्पत्ति-

देशे निजनिजात्मप्रदेशदण्डान् विक्षिपन्ति ता यथोक्तं प्रतरद्वयं स्पृशन्ति। तिर्यग्योनिकस्त्रियश्च तास्ततोऽसङ्ख्येयगुणाः २।

ताभ्यस्त्रिलोके सङ्ख्येयगुणाः। यस्मादधोलोकाद्भवनपतिव्यन्तरनारकाः शेषकाया अपि चोर्द्ध्वलोकेऽपि तिर्यक्पञ्चेन्द्रियस्त्रीत्वेनोत्पद्यन्ते, ऊर्द्ध्वलोकादेवादयोऽप्यधोलोके च समवहता निजनिजात्मप्रदेशदण्डैस्त्रीनपि लोकान् स्पृशन्ति प्रभूताश्च ते। तथा तिर्यग्योनिकस्य्यायुःसंवेदनात्तिर्यग्योनिकस्त्रियश्च ततः सङ्ख्येयगुणाः ३। ताभ्योऽधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये सङ्ख्येयगुणाः, बहवो हि नारकाः समुद्घातं विनापि तिर्यग्लोके तिर्यक्पञ्चेन्द्रियस्त्रीत्वेनोत्पद्यन्ते, तिर्यग्लोकवर्त्तिनश्च जीवास्तिर्यक्स्त्रीत्वेनाधोलौकिकग्रामेष्वपि च। तथा च ते उत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशन्ति तिर्यग्योनिकस्य्यायुःप्रतिसंवेदनाच्च तिर्यग्योनिकस्त्रियोऽपि। तथाऽधोलौकिकग्रामा योजनसहस्रावगाहाः पर्यन्तेऽर्वाक् क्वचित्प्रदेशे नवयोजनशतावगाहा अपि। तत्र काश्चित्तिर्यग्योनिकस्त्रियोऽवस्थानेनापि यथोक्तप्रतरद्वयाध्यासिन्यो वर्त्तन्ते, ततो भवन्ति पूर्वोक्ताभ्यः सङ्ख्येयगुणाः ४। ताभ्योऽधोलोके सङ्ख्येयगुणाः, यतोऽधोलौकिकग्रामाः सर्वेऽपि च समुद्रा योजनसहस्रावगाहास्ततो नवयोजनशतानामधस्ताद्या वर्त्तन्ते मत्स्यीप्रभृतिकास्तिर्यग्योनिकस्त्रियस्ताः स्वस्थानत्वात् प्रभूता इति सङ्ख्येयगुणाः ५।

ताभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात् ६, ॥ ९९ ॥

चउथे १ पढमे २ बीए ३,
पंचम ४ छट्ठे ५ तइज्जए ६ मणुया ।
थोवा १ ऽसंखा २ सेसा,
संखिज्जगुणा ६ कमेणेव ॥ १०० ॥

मनुष्यास्त्रिलोकस्पर्शिनः स्तोकाः, यतो ये ऊर्द्ध्वलोकादधोलौकिकग्रामेषूत्पित्सवो मारणान्तिकसमुद्घातेन समवहता भवन्ति ते च केचित्समुद्घातवशाद्बहिर्निर्गतैरात्मप्रदेशैस्त्रीनपि लोकान् स्पृशन्ति। येऽपि च वैक्रियसमुद्घातमाहारकसमुद्घातं वा गतास्तथाविधप्रयत्नविशेषाद्दूरतरमूर्ध्वाधोविक्षिप्तात्मप्रदेशा ये च केवलिसमुद्घातं गतास्तेऽपि त्रीनपि लोकान् स्पृशन्ति, एते सर्वेऽपि मीलिताः स्तोका एवेति १ । तेभ्यः प्रथमे उर्द्ध्वलोकतिर्यग्लोकप्रतरद्वयरूपेऽसङ्ख्येयगुणाः, यतो वैमानिकाः शेषकायाश्च यथासम्भवमूर्द्ध्वलोकात्तिर्यग्लोके मनुष्यत्वेन समुत्पद्यमाना यथोक्तप्रतरद्वयस्पर्शिनो भवन्ति । विद्याधराणामपि च मन्दरादिषु गमनं, तेषां च शुक्ररुधिरादिपुद्गलेषु सम्मूर्छिममनुष्याणामुत्पाद इति ते विद्याधरा रुधिरादिपुद्गलसम्मिश्रा यदा गच्छन्ति तदा संमूर्छिममनुष्या अपि यथोक्तप्रतरद्वयं स्पृशन्ति, ते चातिबहव इत्यसङ्ख्येयगुणाः २ ।

तेभ्यो द्वितीयेऽधोलोकतिर्यग्लोके प्रतरद्वयात्मनि सङ्ख्येयगुणाः, यतोऽधोलौकिकग्रामेषु स्वभावत एव बहवो मनुष्याः, ततो ये तिर्यग्लोकान्मनुष्येभ्यः शेषकायेभ्यो वाऽधोलौकिकग्रामेषु गर्भजमनुष्यत्वेन सम्मूर्छिममनुष्यत्वेन वोत्पित्सवो येऽधोलोकादधोलौकिकग्रामरूपात् शेषाद्वा मनुष्येभ्यः शेषकायेभ्यो वा तिर्यग्लोके गर्भजमनुष्यत्वेन संमूर्छिममनुष्यत्वेन वोत्पित्सवस्ते यथोक्तं प्रतरद्वयं स्पृशन्ति बहुतराश्च ते। तथा स्वस्थानतोऽपि किञ्चिदधोलौकिकग्रामेषु यथोक्तप्रतरद्वयस्पर्शिन इति ते प्रागुक्तेभ्यः सङ्ख्येयगुणाः ३। तेभ्यः पञ्चमे ऊर्ध्वलोके सङ्ख्येयगुणाः, यतः सौमनसादिषु क्रीडार्थं चैत्यवन्दननिमित्तं वा प्रभूततराणां विद्याधराणां चारणमुनीनां च भावात्, तेषां च रुधिरादिपुद्गलतः सम्मूर्छिममनुष्यसम्भवात् ४। तेभ्यः षष्ठेऽधोलोके सङ्ख्येयगुणाः स्वस्थानत्वेन बहुत्वभावात् ५। तेभ्यस्तृतीये तिर्यग्लोके सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात् स्वस्थानत्वाच्च ६ ॥ १०० ॥

चउथे१ पढमे२ बीए३ पंचम४ छट्ठे५ तइज्जए६ नारी।
थोवा१ संखिज्जगुणा६ कमेण सेसेसु ठाणेसु ॥ १०१ ॥

मानुष्यश्चतुर्थे त्रिलोके स्तोकाः, यतो मनुष्यवत्समुद्घातत्रयगत्या त्रिलोकं स्पृशन्ति। आसां चाहारकसमुद्घातो न भवतीति १। ताभ्यः प्रथमे ऊर्ध्वलोकतिर्यग्लोके सङ्ख्येय-

गुणाः, वैमानिकदेवानां शेषकायानां चोर्द्ध्वलोकात्तिर्यग्लोके मानुषीत्वेनोत्पद्यमानानां तथा तिर्यग्लोकगतमनुष्यस्त्रीणामूर्द्ध्वलोके समुत्पित्सूनां मारणान्तिकसमुद्घातेन दूरतरमूर्द्ध्वविक्षिप्तात्मप्रदेशानामद्यापि कालमकुर्वतीनां यथोक्तप्रतरद्वयस्पर्शनभावात् तासां चोभयासामपि बहुतरत्वात् २। द्वितीयादिलोकभेदचतुष्टये मनुष्यवद्भावना कार्या, मानुषीणां संमूर्छिमत्वाभावान्नासङ्ख्यातत्वम् ॥ १०१ ॥

पंचम १ पढम २ चउत्थे ३,
दुय ४ छट्ठे ५ तइए ६ वि सुरदेवी।
थोव १ असंखा २ संखा ३,
अस्संखा ४ दोसु संखगुणा ६ ॥ १०२ ॥
॥ दारं २४ ॥

पञ्चम ऊर्द्ध्वलोके सामान्यतो देवाः स्तोकाः, वैमानिकदेवानामेव तत्र भावात् तेषां चाल्पत्वात्। येऽपि भवनपतिप्रभृतयो जिनेन्द्रजन्ममहादौ मन्दरादिषु गच्छन्ति तेऽपि स्वल्पा एवेति सर्वस्तोकाः १। तेभ्यः प्रथमे ऊर्ध्वलोकतिर्यग्लोकेऽसङ्ख्येयगुणः, तद्धि ज्योतिष्काणां प्रत्यासन्नमिति स्वस्थानम, तथा भवनपतिव्यन्तरज्योतिष्काणां मन्दरादौ सौधर्मादिकल्पगताः स्वस्थाने गमनागमनेन, तथा ये सौधर्मादिषु देवत्वेनोत्पित्सवो देवायुः प्रतिसंवेदयमानाः स्वोत्पत्तिदेश-

मभिगच्छन्ति ते यथोक्तं प्रतरद्वयं स्पृशन्ति, ततः सामस्त्येन यथोक्तप्रतरद्वयस्पर्शिनोऽतिबहव इति पूर्वेभ्योऽसङ्ख्येयगुणाः २। तेभ्यः चतुर्थे त्रैलोक्ये सङ्ख्येयगुणाः, यतो भवनपतिव्यन्तरज्योतिष्कवैमानिकदेवास्तथाविधप्रयत्नविशेषवशतो वैक्रियसमुद्घातेन त्रीनपि लोकान् स्पृशन्ति ते चेत्थं समवहताः प्रागुक्तप्रतरद्वयस्पर्शिभ्यः सङ्ख्येयगुणाः केवलवेदसोपलभ्यन्ते ३। तेभ्यो द्वितीयेऽधोलोकतिर्यग्लोके सङ्ख्येयगुणाः, तद्धि प्रतरद्वयं भवनपतिव्यन्तरदेवानां प्रत्यासन्नतया स्वस्थानं, तथा बहवो भवनपतयः स्वभवस्थास्तिर्यग्लोकगमागमेन तथोद्वर्त्तमानास्तथा वैक्रियसमुद्घातेन समवहतास्तिर्यग्लोकस्थास्तिर्यक्पञ्चेन्द्रियमनुष्या वा भवनपतित्वेनोत्पद्यमाना भवनपत्यायुरनुभवन्तो यथोक्तप्रतरद्वयस्पर्शिनोऽतिबहव इति सङ्ख्येयगुणाः ४। तेभ्यः षष्ठेऽधोलोके सङ्ख्येयगुणः, भवनपतीनां स्वस्थानत्वात् ५। तेभ्यस्तृतीये तिर्यग्लोके सङ्ख्येयगुणाः, ज्योतिष्कव्यन्तराणां स्वस्थानत्वात् ६। एवं देव्योऽपि। इदमौधिकं देवदेवीविषयमल्पबहुत्वमुक्तम्। विभागतस्तु चतुर्गतिनिकायदेवदेव्यल्पबहुत्वाष्टकं पर्याप्तापर्याप्तैकेन्द्रियादिपृथ्व्यादीनां पृथगल्पबहुत्ववृन्दं च सभावनं प्रज्ञापनासूत्रवृत्तिभ्यां ज्ञेयम् ॥ १०२ ॥ द्वारम् २४ ॥

आउयबंध १ अपज्जत्त २
सुत्त ३, सम्मोहया य ४ सायगया।

अक्खोवउत्त ६ अणगारु-
वउत्ता ७, संखगुणिया उ ॥१०३॥

स्तोका आयुष्कर्मणो बन्धकाः, तद्बन्धकालस्य भवत्रिभागादेः प्रतिनियतत्वात् १ । तेभ्योऽपर्याप्ताः सङ्ख्येयगुणाः, यतोऽपर्याप्ता भवत्रिभागाद्यवशेषायुषः परभवायुर्बन्धन्ति । ततो द्वौ त्रिभागावबन्धकाल एको बन्धकाल इति बन्धकालादबन्धकालः सङ्ख्येयगुणस्तेन सङ्ख्येयगुणा एवापर्याप्ता आयुर्बन्धकेभ्यः २ । तेभ्यः सुप्ताः सङ्ख्येयगुणाः, यतोऽपर्याप्तेषु पर्याप्तेषु च सुप्ता लभ्यन्ते । पर्याप्ताश्चापर्याप्तेभ्यः सङ्ख्येयगुणाः । एतच्च सूक्ष्मजीवानधिकृत्य वेदितव्यम् । सूक्ष्मेषु बाह्यो व्यघातो न भवति, ततस्तदभावाद्बहूनां निष्पत्तिः स्तोकानामेव चानिष्पत्तिरिति ३ । तेभ्यः समवहताः सङ्ख्येयगुणाः, बहूनां पर्याप्तेष्वपर्याप्तेषु च मारणान्तिकसमुद्घातेन समवहतानां लभ्यमानत्वात् ४ । तेभ्यः सातवेदकाः सङ्ख्येयगुणाः, आयुर्बन्धकापर्याप्तसुप्तेष्वपि सातवेदकानामपि लभ्यमानत्वात् ५ । तेभ्य इन्द्रियोपयुक्ताः सङ्ख्येयगुणाः, असातवेदकेष्वपीन्द्रियोपयोगस्य भावात् । तेभ्योऽनाकारोपयोगोपयुक्ताः सङ्ख्येयगुणाः, इन्द्रियोपयोगेषु नोइन्द्रियोपयोगेषु चानाकारोपयोगस्य लभ्यमानत्वात् ७ ॥ १०३ ॥

एएसिं पडिवक्खा पडिलोमं पढम इत्थ संखगुणा ।
सेसा छावि कमेणं विसेसअहिया मुणेयव्वा ॥१०४॥

अप्पज्जत्ता सव्वे सुत्ता पज्जत्तयावि किल केवि ।
जेसिमईया समया संखिज्जा जागरा सेसा ॥१०५॥

॥ द्वारम् २५ ॥

एतेषां सप्तानां प्रतिपक्षाः प्रतिलोमगत्या वाच्याः । तथाहि—अनाकारोपयोगयुक्तेभ्यः साकारोपयुक्ताः सङ्ख्येयगुणाः, इन्द्रियनोइन्द्रियोपयोगेषु साकारोपयोगकालस्य बहुत्वात् ७ । नोइन्द्रियोपयुक्ता विशेषाधिकाः, नोइन्द्रियानाकारोपयुक्तानामपि तत्र प्रक्षेपात् । इन्द्रियोपयोगो हि प्रत्युत्पन्नकालविषयः । यदा त्विन्द्रियदृष्टमेवार्थं विचारयत्योघसंज्ञयापि तदा नोइन्द्रियोपयुक्तः स व्यपदिश्यते । ततो नोइन्द्रियोपयोगकालस्यातीतानागतकालविषयतया बहुकालत्वाद्विशेषाधिकत्वम् ६ । असातवेदका विशेषाधिकाः, इन्द्रियोपयुक्तेष्वप्यसातवेदकानां भावात् ५ । असमवहता विशेषाधिकाः, सातवेदकेष्वपि तद्भावात् ४ । जागरा विशेषाधिकाः, समवहतानामपि केषाञ्चिज्जागरत्वात् ३ । पर्याप्ता विशेषाधिकाः, सुप्तानामपि केषाञ्चित्पर्याप्तत्वात् । सुप्ता हि पर्याप्ता अपर्याप्ता अपि भवन्ति, जागरास्तु पर्याप्ता एवेति नियमः २ । आयुष्कर्मबन्धका विशेषाधिकाः, अपर्याप्तानामप्यायुष्कर्मबन्धकत्वभावात् १ ॥ १०४ ॥ १०५ ॥ द्वारम् २५ ॥

इदमेवाल्पबहुत्वं विनेयजनानुग्रहायासत्कल्पनया स्थापनाराशिभिरुपदर्श्यते । इह द्वे पङ्क्ती उपर्यधोभावेन स्था-

प्येते। तत्रोपरितन्यां पङ्क्तौ आयुष्कर्मबन्धका अपर्याप्ताः सुप्ताः समवहताः सातवेदका इन्द्रियोपयुक्ता अनाकारोपयुक्ताः क्रमेण स्थाप्यन्ते। तस्या अधस्तन्यां पङ्क्तौ तेषामेव पदानामधस्ताद्यथासङ्ख्यमायुरबन्धकाः पर्याप्ता जागरा असमवहता असातवेदका नोइन्द्रियोपयुक्ताः साकारोपयुक्ताश्च। स्थापना चेयम ॥

आयुर्बन्धकाः १	अपर्याप्ताः २	सुप्ताः ४	समवहताः ८
आयुरबन्धकाः २५५	पर्याप्ताः २५४	जागराः २५२	असमवहताः२४८

सातवेदकाः १६	इन्द्रियोपयुक्ताः ३२	अनाकारोपयुक्ताः ६४
असातवेदकाः २४०	नोइन्द्रियोपयुक्ताः२२४	साकारोपयुक्ताः १९२

अत्रोपरितन्यां पङ्क्तौ सर्वाण्यपि पदानि सङ्ख्येयगुणानि। आयुष्पदं च सर्वेषामाद्यमिति तत्परिमाणसङ्ख्यायामेकः स्थाप्यते। ततः शेषपदानि किल जघन्येन सङ्ख्येयेन सङ्ख्येयगुणानीतिद्विगुणद्विगुणोऽङ्कस्तेषु स्थाप्यते। तद्यथा—द्वौ चत्वारोऽष्टौ षोडश द्वात्रिंशच्चतुःषष्टिः। सर्वोऽपि जीवराशिरनन्तानन्तस्वरूपोऽप्यसत्कल्पनया षट्पञ्चाशदधिकशतद्वयपरिमाणः परिकल्प्यते। ततोऽस्माद्राशेरायुर्बन्धकादिगताः सङ्ख्याः शोधयित्वा यच्छेषमवतिष्ठति तदायुरबन्धकादीनां

परिमाणे स्थापयितव्यम् । तद्यथा—आयुरबन्धकपदे द्वे शते पञ्चपञ्चाशदधिके शेषेषु क्रमेण द्वे शते चतुःपञ्चाशदधिके द्वे शते द्विपञ्चाशदधिके द्वे शतेऽष्टौ चत्वारिंशदधिके द्वे शते चत्वारिंशदधिके द्वे शते चतुर्विंशत्यधिके द्विनवत्यधिकं शतम् । एवं च सत्युपरितनपङ्क्तिगतान्यनाकारोपयुक्तपर्यन्तानि पदानि सङ्ख्येयगुणानि द्विगुणद्विगुणाधिकत्वात् । ततः परं साकारोपयुक्तपदमपि सङ्ख्येयगुणं त्रिगुणत्वात् । शेषाणि तु नोइन्द्रियोपयुक्तादीनि प्रतिलोमं विशेषाधिकानि द्विगुणत्वस्यापि क्वचिदभावात् ।

चउथे १ पढम २ दु ३ तइए ४,
पंचम ५ छट्ठेसु पुग्गला कमसो ।
थोवा १ ऽणंता २ अहिया दोसु,
असंखा ५ विसेसहिय ६ ॥ १०६ ॥

इह पुद्गलाः पुद्गलद्रव्यस्कन्धा ग्राह्यास्ते च चतुर्थे त्रैलोक्यस्पर्शिनः स्तोकाः, यस्मान्महास्कन्धा एव त्रैलोक्यव्यापिनस्ते चाल्पा इति १ । तेभ्यः प्रथम ऊर्ध्वलोकतिर्यग्लोकेऽनन्तगुणाः, यतस्तेऽनन्ताः सङ्ख्येयप्रदेशका अनन्ता असङ्ख्येयप्रदेशका अनन्ता अनन्तप्रदेशकाः स्कन्धाः स्पृशन्तीति द्रव्यार्थतयानन्तागुणा इति २ । तेभ्यो द्वितीयेऽधोलोके विशेषाधिका, क्षेत्रस्यायामविष्कम्भाभ्यां मनागविशेषाधिकत्वात्

३ । तेभ्यस्तृतीये तिर्यग्लोकेऽसङ्ख्येयगुणाः, क्षेत्रस्यासङ्ख्येयगुणत्वात् ४ । तेभ्यः पञ्चमे ऊर्ध्वलोकेऽसङ्ख्येयगुणाः, क्षेत्रस्यासङ्ख्येयगुणत्वात् ५ । तेभ्यः षष्ठेऽधोलोके विशेषाधिकाः, ऊर्ध्वलोकादधोलोकस्य विशेषाधिकत्वात् । देशोनसप्तरज्जुप्रमाणो ह्यूर्ध्वलोकः समधिकसप्तरज्जुप्रमाणस्त्वधोलोकः ६ ॥ १०६ ॥

थोवुड्ढे अहियाहे तुल्ला ईसाण निरिइय असंखा ।
वायव्वग्गिसु तुल्ला अहिआ पुव्वाइ अस्संखा ॥१०७॥
अवरेण दाहिणेणं उत्तरओ पुग्गला कमेणहिया ।
खित्ताइविसेसेणं बहुअत्तं वित्तिओ नेयं ॥ १०८ ॥

पुद्गलाः स्तोका ऊर्ध्वदिशि, इह रत्नप्रभासमभूतलमेरुमध्येऽष्टप्रादेशिको रुचकस्तस्मान्निर्गता चतुःप्रादेशिकी ऊर्ध्वा दिग्यावल्लोकान्तस्ततः सर्वस्तोकाः पुद्गलाः १ । तेभ्योऽधोदिशि विशेषाधिकाः, अधोदिगपि रुचकादेव प्रभवति चतुःप्रदेशा यावल्लोकान्तस्ततस्तस्या विशेषाधिकत्वात्तत्र पुद्गला विशेषाधिकाः २ । तेभ्य ईशाननैर्ऋतयोः प्रत्येकमसङ्ख्येयगुणाः, परस्परं तुल्याः, यतस्ते द्वे अपि दिशौ रुचकान्निर्गते मुक्तावलिसंस्थिते तिर्यगूर्ध्वाधोलोकान्तपर्यवसिते, तेन क्षेत्रस्यासङ्ख्येयगुणत्वात्तत्रासङ्ख्येयगुणाः पुद्गलाः ३ । तेभ्यो वायव्याग्नेय्योर्विशेषाधिकाः, परस्परं तुल्याः । कथं विशेषा-

धिकाः ? इति चेदुच्यते, इह सौमनसगन्धमादनेषु सप्त सप्त कूटानि, विद्युत्प्रभमाल्यवतोर्नव नव, तेषु च कूटेषु धृमिकाऽवश्यायादिसूक्ष्मपुद्गलाः प्रभूताः सन्तीति विशेषाधिकाः। स्वस्थाने तु क्षेत्रस्य पर्वतादेश्च समानत्वात्तुल्याः ४। तेभ्यः पूर्वस्यामसङ्ख्येयगुणाः, क्षेत्रस्यासङ्ख्येयगुणत्वात् ५। तेभ्यः पश्चिमायां विशेषाधिकाः, अधोलौकिकग्रामेषु शुषिरभावतो बहूनां पुद्गलानामवस्थानभावात् ६। दक्षिणेन विशेषाधिकाः, बहुभवनशुषिरभावात् ७। तेभ्य उत्तरस्यां विशेषाधिकाः, यत उत्तरस्यामायामविष्कम्भाभ्यां सङ्ख्येययोजनकोटीकोटीप्रमाणं मानससरस्तत्र ये जलचराः पनकसेवालादयश्च सन्त्यस्तेऽतिबहव इति तेषां ये तैजसकार्मणपुद्गलास्तेऽधिकाः प्राप्यन्ते ८॥ १०७॥ १०८॥

णंताणु १ पएस २ अणू ३,
संखाणु ४ पएसया ५ असंखाणू ६।
अंसा य ७ थोव १ णंता
दो ३, संखा दो ५ दुगमसंखं ७॥१०९॥

द्रव्यार्थतयानन्ताणवः स्तोकाः १, त एव प्रदेशार्थतयानन्तगुणाः २। परमाणवो द्रव्यार्थतया प्रदेशार्थतया चानन्तगुणाः ३। सङ्ख्यातप्रदेशिका द्रव्यार्थतया सङ्ख्यातगुणाः ४, त एव प्रदेशार्थतया सङ्ख्यातगुणाः ५। असङ्ख्यातप्रदेशिका

द्रव्यार्थतयाऽसङ्ख्यातगुणाः ६, त एव प्रदेशार्थतयाऽसङ्ख्यातगुणाः ७ ॥ १०६ ॥

एगपएसट्ठिय १ संखइ २,
पएसा ३ असंखठिय ४ अंसा ५ ।
थोवा १ दो संखा ३, दो ४
अस्संखा ५ कालओ चेव ॥ ११ ॥

इह क्षेत्राधिकारतः क्षेत्रप्राधान्यात्परमाणुकाद्यनन्ताणुकस्कन्धा अपि विवक्षितैकप्रदेशावगाढा आधाराधेययोरभेदोपचारादेकद्रव्यत्वेन व्यवहियन्ते, ते इत्थंभूता एकप्रदेशावगाढाः पुद्गलाः सर्वस्तोकाः, लोकाकाशप्रदेशप्रमाणा इत्यर्थः। नहि स कश्चिदेवंभूत आकाशप्रदेशोऽस्ति य एकप्रदेशावगाहनपरिणामपरिणतानां परमाण्वादीनामवकाशदानपरिणामेन परिणतो न वर्तते इति। तेभ्यः सङ्ख्येयप्रदेशावगाढाः पुद्गला द्रव्यार्थतया सङ्ख्येयगुणाः, कथम् ? इहापि क्षेत्रप्राधान्याद् द्व्यणुकाद्यनन्ताणुकस्कन्धा द्विप्रदेशावगाढा एकद्रव्यत्वेन विवक्ष्यन्ते। इह सर्वलोकप्रदेशास्तत्त्वतोऽसङ्ख्येया अपि कल्पनया दश कल्प्यन्ते। ते च प्रत्येकचिन्तायां दशैवेति दश एकप्रदेशावगाढानि द्रव्याणि। तेष्वेव दशसु प्रदेशेष्वन्यग्रहणान्यमोक्षणद्वारेण बहवो द्विकसंयोगा लभ्यन्त इत्येकप्रदेशावगाढेभ्यो द्विप्रदेशावगाढानि द्रव्याणि सङ्ख्येयगुणानि। तेभ्यस्त्रिप्रदेशावगाढानि। एवमुत्तरोत्तरं यावदुत्कृ-

ष्टसङ्ख्येयप्रदेशावगाढानि । असङ्ख्येयप्रदेशावगाढाः पुद्गला द्रव्यार्थतयाऽसङ्ख्येयगुणाः,असङ्ख्यातस्यासङ्ख्यातभेदभिन्नत्वात, त एव प्रदेशार्थतयाऽसङ्ख्येयगुणाः । कालतश्चैकसमयस्थितिकादीनि क्षेत्रावगाढवद्वाच्यानि ॥ ११० ॥

कालाई जह पुग्गल कक्कडमिउगुरुयलहुयफासाओ ।
ओगाढा जह नेया इत्थ पएसापएसट्ठो ॥ १११ ॥

भावत एकगुणकालकादयः पुद्गलद्रव्यवद्वाच्याः । तथाहि–अनन्ताणुका एकगुणकालका द्रव्यार्थतया स्तोकाः १ । त एवैकगुणकालकाः प्रदेशार्थतयाऽनन्तगुणाः २ । अणव अणव एकगुणकालका द्रव्यप्रदेशार्थाभ्यामनन्तगुणाः ३ । सङ्ख्याताणुका एकगुणकाला द्रव्यतः सङ्ख्येयगुणाः ४ । त एवैकगुणकालाः प्रदेशतः सङ्ख्येयगुणाः ५ । असङ्ख्याताणुका एकगुणकाला द्रव्यतोऽसङ्ख्येयगुणाः ६ । त एवैकगुणकालाः प्रदेशतोऽसङ्ख्येयगुणाः ७ ।

एवमनन्ताणुकाः सङ्ख्येयगुणकाला द्रव्यतः स्तोका १ । त एव सङ्ख्येयगुणकालाः प्रदेशतोऽनन्तगुणाः २ । अणवः सङ्ख्येयगुणकालाः द्रव्यप्रदेशार्थाभ्यामनन्तगुणाः ३ । सङ्ख्याताणुकाः सङ्ख्येयगुणकाला द्रव्यतः सङ्ख्येयगुणाः ४ । त एव सङ्ख्येयगुणकालाः प्रदेशतः सङ्ख्येयगुणाः ५ । असङ्ख्याताणुकाः सङ्ख्येयगुणकाला द्रव्यार्थतयाऽसङ्ख्येयगुणाः

६। त एव सङ्ख्येयगुणकालाः प्रदेशतोऽसङ्ख्येयगुणाः ७। एवमनन्ताणुकादयोऽसङ्ख्यातगुणकाला अनन्तगुणकालका वाच्याः ७।

एवं शेषवर्णगन्धरसस्पर्शा अपि। परं कर्कशादय एकप्रदेशाद्यवगाढवद्वाच्याः। यथा एकप्रदेशावगाढा एकगुणकर्कशाः स्तोकाः १। सङ्ख्येयप्रदेशावगाढा एकगुणकर्कशा द्रव्यतः सङ्ख्येयगुणाः २। त एव प्रदेशतः सङ्ख्येयगुणाः ३। असङ्ख्येयप्रदेशावगाढा एकगुणकर्कशा द्रव्यतोऽसङ्ख्येयगुणाः ४। त एव प्रदेशार्थतयाऽसङ्ख्येयगुणाः ५। एवं सङ्ख्येयासङ्ख्येयानन्तगुणकर्कशादयोऽपि वाच्याः। एवं मृदुगुरुलघवः। एतद्गाथाभावना वृत्तावतिदेशेनोक्ता प्रज्ञापनासूत्रात्संभाव्य लिखितास्तीति ज्ञेयम् ॥ १११ ॥

जह दुपएसोगाढा,
दव्वट्ठाए उ कप्पिय सहस्सं ।
ते उ पएसट्ठाए,
दु चिय इय कालभावावि ॥११२॥
खंधा अणवो वा जे
एगपएसावगाहिणो ते उ ।
लोगपएसपमाणा,
इक्किक्के जमवगाढत्ति ॥११३॥

ते चेव दुगाइसु
जे ओगाढा ते भवंति बहुयतरा ।
संजोगबहुत्तेणं (दारं२६)
इओ महादंडयं भणिमो ॥११४॥

'जह' द्वावेव सहस्रौ क्षेत्रप्रदेशार्थाधिकारात् ॥ ११२ ॥ 'खंधा' ॥ ११३ ॥ 'ते चेव' द्वारम् २६ । इतो महादण्डकं भणामः ।

थोवा गब्भयमणुया १
संखिज्जगुणा हवंति इत्थीओ २ ।
पज्जत्तबायरानल-
काया ३, असंखया हुंति ॥११५॥
तत्तोऽणुत्तरवासी,
असंखगुणिया हवंति ४ तत्तो उ ।
संखिज्जा गेविज्जा,
उवरिम ५ मज्झिल्ल ६ हिट्ठिल्ला ७ ॥११६॥
अच्चुय ८ आरण ९ पाणय १०,
आणय ११ देवा वि हुंति एमेव ।
तत्तो असंखगुणिया,
सत्तमपुढवीइ नेरइया ॥ १२ ॥

'थोवा' इति गाथाष्टादशकम् । स्तोका मनुष्याः, सङ्ख्ये यकोटीकोटीप्रमाणत्वात् १ । मनुष्यस्त्रियः सङ्ख्ये यगुणाः, सप्तविंशतिगुणत्वात्सप्तविंशत्यधिकत्वाच्च २ । ताभ्यो बादराग्नयः पर्याप्ता असङ्ख्यगुणाः, कतिपयवर्गन्यूनावलिकाघनसमयप्रमाणत्वात् ३ ॥ ११५ ॥

अनुत्तरोपपातिनोऽसङ्ख्ये यगुणाः, क्षेत्रपल्योपमासङ्ख्ये यभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात् ४ । उपरितनग्रैवेयकत्रिकदेवाः सङ्ख्ये यगुणाः, बृहत्तरक्षेत्रपल्योपमासङ्ख्ये यभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात् । यतोऽनुत्तरसुराणां पञ्च विमानानि, उपरितनग्रैवेयकत्रिके तु विमानशतम्, प्रतिविमानं चासङ्ख्ये या देवाः, यथा यथा चाधोऽधोवर्तीनि विमानानि तथा तथा देवा अपि प्राचुर्येण लभ्यन्त इति । एवमुत्तरत्रापि भावना कार्या यावदानतः ५ । मध्यमग्रैवेयकत्रिकदेवाः सङ्ख्ये यगुणाः ६ । अधस्तनग्रैवेयकत्रिकदेवाः सङ्ख्ये यगुणाः ७ ॥ ११६ ॥

अच्युतकल्पदेवाः सङ्ख्ये यगुणाः ८ । आरणदेवाः सङ्ख्ये यगुणाः । यद्यप्यारणाच्युतकल्पौ समश्रेणीकौ समविमानसङ्ख्याकौ तथापि कृष्णपाक्षिकास्तथास्वाभाव्यात्प्राचुर्येण दक्षिणस्यामुत्पद्यन्ते नोत्तरस्याम् । बहवश्च कृष्णपाक्षिकाः स्तोकाः शुक्लपाक्षिका इति ९ । प्राणतदेवाः सङ्ख्ये यगुणाः १० ।

आनतदेवाः सङ्ख्ये यगुणाः ११ । सप्तमपृथिवीनैरयिका असङ्ख्ये यगुणाः, श्रेण्यसङ्ख्ये यभागगतनभःप्रदेशराशिप्रमाणत्वात् १२ ॥ ११७ ॥

छट्ठाइ १३ सहस्सारे १४
महसुक्के १५ पंचमाइ १६ लंतम्मि १७ ।
पंकाइ १८ बंभलोए १९,
तचा पुढवोइ २० माहिंदे २१ ॥११८॥
कमसो असंखगुणिया,
सणंकुमारे य २२ हुंतसंखिज्जा ।
दुचाए २३ असंखिज्जा
मुच्छिममणुयावि २४ एमेव ॥ १९ ॥
तेसिं तु असंखगुणा
ईसाणसुरा उ २५ संखदेवी उ २६ ।
सोहम्मकप्पदेवा २७
देवी संखिज्ज २८ कमसो य ॥ २० ॥

षष्ठपृथिवीनारका असङ्ख्ये यगुणाः १३ । सहस्रारदेवा असङ्ख्ये यगुणाः १४ । महाशुक्रेऽसङ्ख्ये यगुणाः, यतः सहस्रारे षट् महाशुक्रे चत्वारिंशत् सहस्राणि विमानानाम्, अधोऽधोविमानेषु देवानां बहुबहुतरत्वाच्च १५ । पञ्चमपृथिव्यां १६ लान्तके १७ चतुर्थ्यां पङ्कप्रभायां १८ ब्रह्मलोके १९

तृतीयस्यां वालुकायां २० माहेन्द्रे २१ सनत्कुमारे २२ द्वितीयस्यां शर्करायां २३ यथोत्तरमसङ्ख्ये यासङ्ख्ये यगुणाः । एते च सप्तमपृथिवीनारकादयो द्वितीयपृथिवीनारकान्ताः प्रत्येकं स्वस्थाने सर्वेऽपि घनीकृतलोकश्रेण्यसङ्ख्ये यभागवर्त्तिनभःप्रदेशराशिप्रमाणा द्रष्टव्याः । परं श्रेण्यसङ्ख्ये यभागोऽसङ्ख्ये यभेदभिन्नस्तत इत्थमसङ्ख्ये यगुणा वाच्याः । संमूछिममनुष्या असङ्ख्ये यगुणाः, ते ह्यङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि तृतीयवर्गमूलेन गुणिते प्रथमवर्गमूले यावान् प्रदेशराशिस्तावत्प्रमाणानि खण्डानि यावन्त्येकस्यामेकप्रादेशिक्यां श्रेणौ भवन्ति तावत्प्रमाणाः २४ ॥ ११८–११९ ॥ ईशाने देवा असङ्ख्ये यगुणाः, यतोऽङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि द्वितीयवर्गमूले तृतीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाण ईशाने देवदेवीसमुदायः, तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पा ईशानदेवाः २५ । ईशानदेव्यः सङ्ख्ये यगुणाः, द्वात्रिंशद्गुणत्वात् २६ । सौधर्मदेवाः सङ्ख्ये यगुणाः, यथा माहेन्द्रापेक्षया सनत्कुमारे देवा असङ्ख्ये यगुणा उक्ताः । इहापि दक्षिणस्यां कृष्णपाक्षिकोत्पत्त्यादिपूर्वोक्तयुक्तेर्विमानबाहुल्याच्च समानत्वेऽप्यत्र सङ्ख्ये यगुणत्वं ज्ञेयं वचनप्रामा-

ण्यात् २७। सौधर्मदेव्यः सङ्ख्ये यगुणाः, द्वात्रिंशद्गुणत्वात् २८॥ १२०॥

भवणसुर असंखिज्जा २९,
देवी संखिज्ज ३० रयण अस्संखा ३१।
खयहरपुरिसा ३२ इत्थी ३३
थलयरपुरिसा य ३४ इत्थीओ ३५॥१२१॥

भवनवासिनोऽसङ्ख्ये यगुणाः, यतोऽङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि प्रथमे वर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणो भवनपतिदेवदेवीसमुदायः, तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पाश्च तद्देवाः २९। भवनपतिदेव्यः सङ्ख्ये यगुणाः, द्वात्रिंशद्गुणत्वात् ३०। रत्नप्रभानारका असङ्ख्ये यगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि प्रथमे वर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणत्वात् ३१। खचरपञ्चेन्द्रियतिर्यग्योनिकाः पुरुषा असङ्ख्ये यगुणाः, प्रतरासङ्ख्ये यभागवर्त्यसङ्ख्ये यश्रेणिनभः—प्रदेशराशिप्रमाणत्वात् ३२। खचरपञ्चेन्द्रियतिर्यग्योनिकाः स्त्रियः सङ्ख्ये यगुणाः, त्रिगुणत्वात् ३३। स्थलचरपञ्चेन्द्रियतिर्यक्पुरुषाः सङ्ख-

ये यगुणाः, बृहत्तरप्रतरासङ्ख्ये यभागवर्त्यसङ्ख्ये यश्रेणिगतप्रदेशराशिप्रमाणत्वात् ३४। तेषां स्त्रियः सङ्ख्ये यगुणाः, त्रिगुणत्वात् ३५ ॥ १२१ ॥

जलयरपुरिसा ३६ इत्थी ३७
वणपुरिसा, ३८ इत्थि ३९ जोइसुर ४० इत्थी ४१ ।
कमसो संखिज्जगुणा
विहगनपुंसा य संखिज्जा ४२ ॥ १२२ ॥
थल ४३ जलयरा ४४ नपुंसा
चउरिंदिसमत्त हुंति संखगुणा ४५ ।
पंचिंदिय ४६ बेइंदिय ४७
तेइंदिय ४८ समत्त सविसेसा ॥ १२३ ॥

जलचरपञ्चेन्द्रियतिर्यक्पुरुषाः सङ्ख्ये यगुणाः, बृहत्तरप्रतराङ्ख्ये यभागवर्त्यसङ्ख्ये यश्रेणिगतनभःप्रदेशराशिप्रमाणत्वात् ३६। तेषां स्त्रियः सङ्ख्ये यगुणाः, त्रिगुणत्वात् ३७। व्यन्तरदेवाः सङ्ख्ये यगुणाः, यतः सङ्ख्ये ययोजनकोटीकोटीप्रमाणानि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावान् व्यन्तरदेवदेवीसमुदायः, तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पा व्यन्तरपुरुषाः ३८। व्यन्तर्यः सङ्ख्ये यगुणाः द्वात्रिंशद्गुणत्वात् ३९। ज्योतिष्कदेवाः सङ्ख्ये यगुणाः, ते हि सामान्यतः षट्पञ्चाशदधिकशतद्वयाङ्गुलः

प्रमाणानि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणाः, तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पास्ते ४० । ज्योतिष्कदेव्यः सङ्ख्ये यगुणाः द्वात्रिंद् गुणत्वात् ४१ । खचरपञ्चेन्द्रियनपुंसकाः सङ्ख्ये यगुणाः ४२॥१२२॥ स्थलचरपञ्चेन्द्रियनपुंसकाः सङ्ख्ये यगुणाः ४३ । जलचर-पञ्चेन्द्रियनपुंसकाः सङ्ख्ये यगुणाः ४४ । पर्याप्तचतुरिन्द्रियाः सङ्ख्ये यगुणाः ४५ । पर्याप्तपञ्चेन्द्रियाः संज्ञ्यसंज्ञिभेदा विशेषाधिकाः ४६ । पर्याप्तद्वीन्द्रिया विशेषाधिकाः ४७ । पर्याप्तत्रीन्द्रिया विशेषाधिकाः, यद्यपि पर्याप्तचतुरिन्द्रियादीनां पर्याप्तत्रीन्द्रियपर्यन्तानां प्रत्येकमङ्गुलासङ्ख्ये यभागमात्राणि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणत्वेऽप्यङ्गुलसङ्ख्ये यभागस्य सङ्ख्ये यभेदभिन्नत्वादित्थं विशेषाधिकत्वं न विरुद्धम् ४८ ॥ १२३ ॥

पंचिंदिय अपजत्ता, असंख ४९ चउ
५० तिंदि ५१ बिंदि ५२ सविसेसा ।
वणपत्तेयसमत्ता
असंखगुणिया, मुणेयव्वा ५३ ॥ १२४ ॥

अपर्याप्तपञ्चेन्द्रिया असङ्ख्यातगुणाः ४९ । अपर्याप्त-चतुरिन्द्रिया विशेषाधिकाः ५० । अपर्याप्तत्रीन्द्रिया विशेषाधिकाः ५१ । अपर्याप्तद्वीन्द्रिया विशेषाधिकाः, यद्यपि चाप-

र्याप्तपञ्चेन्द्रियादयोऽपर्याप्तद्वीन्द्रियपर्यन्ताः प्रत्येकमङ्गुलासङ्ख्येयभागमात्रखण्डानि सूचीरूपाणि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा विशेषेणोक्तास्तथाप्यङ्गुलासङ्ख्येयभागस्य विचित्रत्वादित्थं विशेषाधिकत्वं न विरुद्धम् ५२। प्रत्येकबादरवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः, यद्यपि चापर्याप्तद्वीन्द्रियादिवत्पर्याप्तबादरवनस्पतिकायिका अप्यङ्गुलासङ्ख्येयभागमात्राणि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा अन्यत्रोक्तास्तथाप्यङ्गुलासङ्ख्येयभागस्यासङ्ख्येयभेदभिन्नत्वाद्बादरपर्याप्त—प्रत्येकवनस्पतिपरिमाण—चिन्तायामङ्गुलासङ्ख्येयभागोऽसङ्ख्येयगुणहीनो गृह्यते ततो न कश्चिद्विरोधः ५३ ॥ १२४ ॥

बायरनिगोअ समत्ता ५४,
पुढवी ५५ आऊ ५६ वाऊ ५७ एमेव ।
कमसो असंखगुणिया ५८
बायरतेऊ असंपुन्ना ५८ ॥ १२५ ॥

पत्तेयवणं ५९ बायर निगोय ६०
पुढवि ६१ जल ६२ वाउ ६३ तह चेव ।
सव्वे वि अपज्जत्ता
असंखया सुहुमतेऊ अ ६४ ॥ १२६ ॥

बादरनिगोदा अनन्तकायिकशरीररूपाः पर्याप्ता असङ्खये यगुणाः ५४ । बादरपृथिवीकायिकाः पर्याप्ता असङ्खये यगुणाः ५५ । पर्याप्तबादराप्कायिका असङ्खये यगुणाः, यद्यपि पर्याप्तबादरप्रत्येकवनस्पतिकायिकपृथिव्यप्कायिकाः प्रत्येकमङ्गुलासङ्ख्ये यभागमात्राणि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा उक्तास्तथाप्यङ्गुलासङ्ख्ये यभागस्यासङ्ख्ये यभेदभिन्नत्वादित्थमसङ्ख्ये यगुणत्वं न विरुद्धम् ५६ । पर्याप्तबादरवायुकायिका असङ्ख्ये यगुणाः, घनीकृतलोकासङ्ख्ये यभागवर्त्यसङ्ख्ये यप्रतरगतनभःप्रदेशराशिप्रमाणत्वात् ५७ । अपर्याप्तबादराग्निकायिका असङ्ख्ये यगुणाः, असङ्ख्ये यलोकाकाशप्रदेशराशिप्रमाणत्वात् ५८ ॥ १२५ ॥ प्रत्येकबादरवनस्पतयोऽपर्याप्ता असङ्ख्ये गुणाः ५९ अपर्याप्तबादरनिगोदा असङ्ख्ये यगुणाः ६० । अपर्याप्तबादरपृथिवीकायिका असङ्ख्ये यगुणाः ६१ । अपर्याप्तबादराप्कायिका असङ्ख्येयगुणाः ६२ । अपर्याप्तबादरवायुकायिका असङ्ख्येयगुणाः ६३ । अपर्याप्तसूक्ष्मतेजस्कायिका असङ्ख्ये यगुणाः ६४ ॥ १२६ ॥

पुढवि ६५ जला ६६ निल ६७ सुहुमा
असमत्त विसेस हुंति कमसो उ ।

सुहुमागणि पज्जत्ता ६८
संखिज्जगुणा उ नायव्वा ॥ १२७ ॥
सुहुमावणि ६९ जल ७० वाऊ,
७१ पज्जत्त विसेस हुंतऽसंखिज्जा ।
सुहुमनिगोअ अपज्जत्तया उ
७२ पज्जत्त संखिज्जा ७३ ॥ १२८ ॥
अभव ७४ परिवडियदिट्ठी ७५
सिद्धा ७६ बायरवणा य पज्जत्ता ७७ ।
कमसो अणंतगुणिया
बायरपज्जत्त सविसेसा ७८ ॥ १२९ ॥

अपर्याप्तसूक्ष्मपृथिवीकायिका विशेषाधिकाः ६५ । अपर्याप्तसूक्ष्माप्कायिका विशेषाधिकाः ६६ । अपर्याप्तसूक्ष्मवायुकायिका विशेषाधिकाः ६७ । सूक्ष्माग्निकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, अपर्याप्तसूक्ष्मेभ्यः पर्याप्तसूक्ष्माणां स्वभावत एव प्राचुर्यात् ६८ ॥ १२७ ॥ पर्याप्तसूक्ष्मपृथिवीकायिका विशेषाधिकाः ६९ । पर्याप्तसूक्ष्माप्कायिका विशेषाधिकाः ७० । पर्याप्तसूक्ष्मवायुकायिक विशेषाधिकाः ७१ । अपर्याप्तसूक्ष्मनिगोदा असङ्ख्येयगुणाः ७२ । पर्याप्तसूक्ष्मनिगोदाः सङ्ख्येयगुगुणाः, यद्यपि च पर्याप्ततेजस्कायिकादयः पर्याप्तसूक्ष्मनिगोदपर्यन्ता अविशेषेणान्यत्राप्यसङ्ख्येयलोकाकाशप्रदे-

शराशिप्रमाणा उक्तास्तथापि लोकासङ्ख्येयत्वस्यासङ्ख्येयभेद-भिन्नत्वादित्थमल्पबहुत्वमभिधीयमानमुपपन्नं द्रष्टव्यम् ७३ ॥ १२८ ॥ अभवसिद्धिका अनन्तगुणाः, जघन्ययुक्तानन्तक-प्रमाणत्वात् ७४ । प्रतिपतितसम्यग्दृष्टयोऽनन्तगुणाः ७५ । सिद्धा अनन्तगुणाः ७६ । पर्याप्तबादरवनस्पतिकायिका अन-न्तगुणाः ७७ । सामान्यतो बादरपर्याप्ता विशेषाधिकाः, बादर-पर्याप्तपृथिव्यादीनामपि तत्र प्रक्षेपात् ७८ ॥ १२९ ॥

बायरवण अपज्जत्ता
असंख ७९ बायरसमत्त सविसेसा ८० ।
सविसेस बायरा ८१ सुहुम-
वण अपज्जा ८२ असंखिज्जा ॥ १३० ॥
सुहुम असमत्त अहिया ८३
सुहुमवणस्सइ य संख पज्जत्ता ८४ ।
सुहुमसमत्ता ८५ सुहुमा ८६
भविया य ८७ निगोय ८८ वणजीवा ८९ ॥१३१॥

बादरापर्याप्तवनस्पतयोऽसङ्ख्येयगुणाः, एकैकबादरनिगोद-पर्याप्तनिश्रयाऽसङ्ख्येयगुणानां बादरापर्याप्तनिगोदानां संभवात् ७९ । सामान्यतो बादरापर्याप्ता विशेषाधिकाः, बादरापर्याप्त-पृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ८० । सामान्यतो बादरा विशेषाधिकाः, पर्याप्तापर्याप्तानामपि तत्र प्रक्षेपात् ८१ ।

सूक्ष्मवनस्पतयोऽपर्याप्ता असङ्ख्येयगुणाः ८२ ॥ १३० ॥ सामान्यतः सूक्ष्मापर्याप्ता विशेषाधिकाः, सूक्ष्मापर्याप्तपृथिव्यादीनामपि तत्र प्रक्षेपात् ८३ । पर्याप्तसूक्ष्मवनस्पतयः सङ्ख्येयगुणाः, पर्याप्तसूक्ष्माणामपर्याप्तसूक्ष्मेभ्यः स्वभावत एव सङ्ख्येयगुणत्वात् ८४ । सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, पर्याप्तसूक्ष्मपृथिव्यादीनामपि तत्र प्रक्षेपात् ८५ । सामान्येन सूक्ष्मा विशेषाधिकाः, अपर्याप्तानामपि तत्र प्रक्षेपात् ८६ । भवसिद्धिका भव्या विशेषाधिकाः, जघन्ययुक्तानन्तकमात्राभव्यपरिहारेण सर्वजीवानां भव्यत्वात् ८७ । सामान्यतो निगोदजीवा विशेषाधिकाः, इह भव्या अभव्याश्चातिप्राचुर्येण बादरसूक्ष्मनिगोदजीवराशावेव प्राप्यन्ते नान्यत्र । अन्येषां सर्वेषामपि मिलितानामसङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात् । अभव्याश्च युक्तानन्तकसङ्ख्यामात्रपरिमाणास्ततो भव्यापेक्षया ते किंचिन्मात्राः । भव्याश्च प्रागभव्यपरिहारेण चिन्तिताः । इदानीं तु बादरसूक्ष्मनिगोदचिन्तायां तेऽपि प्रक्षिप्यन्ते इति विशेषाधिकाः ८८ । सामान्यतो वनस्पतयो विशेषाधिकाः, प्रत्येकवनस्पतीनामपि तत्र प्रक्षेपात् ८९॥१३१॥

एगिंदि ९० तिरिक्खा ९१ मिच्छ-
दिट्ठी ९२ अविरय ९३ तहेव सकसाया ९४ ।
छउमत्थ ९५ सजोगि ९६ भवत्थ
९७ सव्व ९८ सव्वे विसेसहिया ॥१३२॥

इय अट्ठाणउइपयं सव्वजियप्पबहुमिइ पयं तइयं ।
पण्णवणाए सिरिअभयदेवसूरीहिं संगहियं ॥१३३॥

सामान्यत एकेन्द्रिया विशेषाधिकाः, बादरसूक्ष्मपृथिव्यादीनामपि तत्र प्रक्षेपात् ९० । सामान्यततर्यञ्चो विशेषाधिकाः, पर्याप्तापर्याप्तद्वीन्द्रियादीनामपि तत्र प्रक्षेपात् ९१ । चतुर्गतिभाविनो मिथ्यादृष्टयो विशेषाधिकाः, इह कतिपयाविरतसम्यग्दृष्ट्यादिसंज्ञिव्यतिरेकेण शेषाः सर्वेऽपि तिर्यञ्चो मिथ्यादृष्टिचिन्तायां चासङ्ख्येयनारकादयस्तत्र प्रक्षिप्यन्ते ततस्तिर्यग्जीवापेक्षया चतुर्गतिका मिथ्यादृष्टयश्चिन्त्यमाना विशेषाधिकाः ९२ । अविरता विशेषाधिकाः, अविरतसम्यग्दृष्टीनामपि तत्र प्रक्षेपात् ९३ । सकषायिणो विशेषाधिकाः, देशविरतादीनामपि तत्र प्रक्षेपात् ९४ । छद्मस्था विशेषाधिकाः, उपशान्तमोहादीनामपि तत्र प्रक्षेपात् ९५ । सयोगिनो विशेषाधिकाः, सयोगिकेवलिनामपि तत्र प्रक्षेपात् ९६ । संसारस्था विशेषाधिकाः, अयोगिकेवलिनामपि तत्र प्रक्षेपात् ९७ । सर्वजीवा विशेषाधिकाः, सिद्धानामपि तत्र प्रक्षेपात् ९८ ॥ १३२ ॥

इत्युक्तप्रकारेण प्रकृमादस्मिन्महादण्डके भावप्रधानत्वान्निर्देशस्य सर्वजीवाल्पबहुत्वमुक्तम् । अष्टानवतिसङ्ख्यानि

गर्भजमनुष्यादीनि पदानि यस्मिंस्तत्तथा । अथ समर्थयन्नाह– इति पदं तृतीयं दिगादिसप्तविंशतिद्वारात्मकं बहुवक्तव्याभिधानं प्रज्ञापनायाः श्रीअभयदेवसूरिभिः संगृहीतं बहुभव्योपकारिसारार्थसंग्रहेणेति ॥ १३३ ॥

॥ समाप्तेयं सावचूरिका
प्रज्ञापनोपाङ्गतृतीयपदसङ्ग्रहणी ॥

हमारा अमूल्य प्रकाशनो

नारकी	चित्रावली	गुजराती	३०-००
,,	,,	हिन्दी	३०-००
,,	,,	अंग्रेजी	४०-००
सत्कर्म	चित्रावली	गुजराती	२०-००
,,	,,	हिंदी	२०-००
,,	,,	अंग्रेजी	२५-००
कल्पसूत्र	चित्रावली	गुजराती	१००-००
,,	,,	हिंदी	१००-००
,,	,,	अंग्रेजी	१२०-००
पंच प्रतिक्रमण विवरण (९०० पेज)			१२५-००
उपमितिभवप्रपंचा विवरण भाग १			६०-००
,,	,, भाग २		८०-००
,,	,, भाग ३		८०-००
सामायिक सूत्र (अंग्रेजी) (सचित्र)			४-००
,,	गुजराती सचित्र		२-५०
बेप्रतिक्रमण सूत्रो अंग्रेजी (सचित्र)			८-००
Matsyolare the is rate			6-00
बे प्रतिक्रमण विधि सहित			१०-००

श्री हर्षपुष्पामृत जैन ग्रंथमाला

C/o श्रुत ज्ञान भवन

४५ दिग्विजय प्लोट जामनगर (सौराष्ट्र)